Research Journal

Peer Reviewed Journal of Fundamental & Comparative Research

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY, RAMTEK

Interdisciplinary Research Journal

ISSN No. 2277-7067

Shodha Samhita

शोधसंहिता

Volume - IV (अङ्कः 4)

विश्वविद्यालयगीतम्

शतशतकोटिशरत्पर्यन्तम्
प्रवहतात् संस्कृतमन्दाकिनी ।।धृ।।

सिन्धु–शुतुद्री–सरस्वतीनाम्
तटे ऋषीणां ध्यानपराणाम्
होमधूमपावितलोकानाम्
अत्रिभृगूणां छन्दोवाणी ।।1।।
प्रवहतात्.......

वाल्मीकिमुनि – व्यासविरचिता
रामकृष्णयोः पावन–गाथा
अखण्डदीपो भगवद्गीता
कर्मयोगसंदेशवाहिनी ।।2।।
प्रवहतात्....

राष्ट्रैक्यस्य च महती स्फूर्तिः
विना संस्कृतं नैव संस्कृतिः
पुष्टिं तुष्टिं समावहन्ती
इह परत्र कल्याणकारिणी ।।3।।
प्रवहतात् ......

रचयिता – महाकवि : डॉ. श्री. ग. बा. पळसुले

2014-2015 Volume - IV

Research Journal
ISSN No. 2277-7067

Peer Reviewed Journal of Fundamental & Comparative Research

शोधसंहिता

Interdisciplinary Research Journal of K.K. Sanskrit University

- Editor in Chief -

Dr. Uma Vaidya
Hon'ble Vice Chancellor

- General Editor -

Dr. Madhusudan Penna

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY RAMTEK

ISSN No. 2277-7067

शोधसंहिता

Interdisciplinary Research Journal of KKSU

Peer Reviewed Journal of Fundamental & Comparative Research

Editor in Chief : **Dr. Uma Vaidya**
Hon'ble Vice Chancellor

General Editor : **Dr. Madhusudan Penna**

Published by : **Dr. Aravind Joshi**, Registrar

Editorial Board

Dr. Nanda Puri, **Dr. C.G.Vijaykumar**, **Dr. Lalita Chandratre**
Dr. Krishnakumar Pandey, **Dr. Deepak Kapde** (Secretary)

Peer Review Committee

Dr. Leena Rastogi, **Dr. D. K. Kulkarni**

The Editor in Chief, General Editor & the Editorial Board will not be responsible for the thoughts, ideas expressed by the authors of the articles. The author will be solely responsible for his/her ideas and thoughts. Hence, in case of any controversy, the Editor in Chief, General Editor and the Editorial Board should not be made the party.

Kavikulaguru Kalidas Sanskrit University, Ramtek
Administrative Building, Mouda Road,
Ramtek, Dist. Nagpur (Maharashtra) India.
Email-unikalidas@yahoo.com
www - kksanskrituni.digitaluniversity.ac

संपादकीयम्

संस्कृत–तदितरभाषाविषयकं शास्त्रविषयकञ्च संशोधनं विदधतां विपश्चिद्वराणां संशोधने कृतप्रवेशानाञ्च संशोधकानां पुरतः शोधसंहिताया नवीनमिममङ्कं समर्पयन्त्याः मे महानानन्दो भवति। अत एव शोधसंहिताया माध्यमेन नवीनम् उपयुक्तञ्च संशोधनं वयं प्रकाशयितुं सर्वदा उद्युक्ता इति न तिरोहितं भवताम्।

सांप्रतिककाले संस्कृतविषये जनानां मनस्सु महत्यभिरुचिर्दृश्यते । जगति बहुत्र संस्कृतसंबद्धं विविधविषयकं संशोधनं प्रचलति। आधुनिकविज्ञानेन सह प्राचीनभारतीय–चिन्तनस्य तुलनां कृत्वा भारतीयविज्ञानधारायाः महत्त्वं प्रतिपादयतां संशोधकानां संख्या च गरीयसी प्रतिभाति। अर्थशास्त्रस्य, वैमानिकशास्त्रस्य, कृषिशास्त्रस्य तदितरशास्त्रस्य च मौलिकविषयैः सह तुलना भवतु नाम परं तया सह प्राचीनविज्ञानस्य गरिमा नूनं प्रतिपादनीयः ।

लक्ष्यमिदं मनसि निधाय विद्वद्वरैः प्रवर्तितं संशोधनं शोधसंहिता–प्रकाशनद्वारा प्रतिवर्षं जिज्ञासूनां लाभाय प्रकाश्यते। अङ्केऽस्मिन् तादृशां शोधपूर्णलेखानां प्रकाशनं कृतम्। लेखाश्च विविधविषयकाः।

अङ्कस्यास्य वैशिष्ट्यमिदं वर्तते यत् ऐदंप्राथम्येन शोधच्छात्राणां लेखाश्च प्रकाश्यन्ते । एतेन संशोधनक्षेत्रे शोधच्छात्राः अपि सोत्साहं प्रवर्तेरन् इति कामनैवात्र कारणम् ।

नवीनसंशोधकाः प्राप्तप्रेरणा अग्रे अस्यां दिशि प्रवर्तन्तामिति शुभकामना मे।

कुलगुरुः

Journal of Kavikulaguru Kalidas Sanskrit University, Ramtek ISSN No. 2277-7067

अनुक्रमणिका

प्रातिपदिकार्थसूत्रे वचनग्रहणमावश्यकं न वा?	डॉ.सि.एस्.एस्.नरसिंहमूर्तिः	1–9
Teaching Strategies based on Integration of Multiple Intelligences And Learning Styles	Dr. Mrs. Indumati T. Bharambe	10–24
Development of Human Houses in Vastu Sastra	Dr. Remadevi. V.	25–32
अधिगमः भारतीयदर्शनञ्च	नारायण वैद्य	33–39
व्याकरणशास्त्रे लोकजीवनम	डॉ. शिवरामभट्टः	40–46
Sri Madhvacharya on Bhagavad Gita (Central Teaching of Bhagavad Gita by Sri Madhva)	Dr. Saroj Kumar Padhi	47–58
विविधशिक्षाग्रन्थेषु वर्णसंख्याविचारः	डॉ. जयवन्त चौधरी	59–70
हयवरट्सूत्रविषये सुधानिधिकृन्मतसमीक्षा	डॉ. पङ्कजकुमारव्यासः	71–78
प्रकृतौ भवं प्राकृतम्	डॉ. राजेन्द्र चि. जैन	79–85
वैदिकमन्त्राणां संस्कृतपद्यानुवादः मन्युसूक्तम् (ऋ 10-83-84)	प्रा. रमेश खेर	86–93
The Advaita Polemics	Dr. Penna Madhusudan	94–105
विवाहमुहूर्तविचारः	डॉ. दिनकर मराठे	106–111

अनुबन्धः
शोधछात्राणां शोधलेखाः

संहिता ज्योतिषांतर्गत पर्जन्य विचार	मुकुंद दिंगबर मोहोळकर डॉ. कृष्णकुमार पाण्डेय	113–125
The System of Varnashram in the Atharvaved	Dr. C. B. Moghe	126–140
कालचक्रदशा–एक वैविध्यपूर्ण फलित दशापध्दती	राजन अनंत केळकर डॉ. कृष्णकुमार पाण्डेय	141–149

Vol. IV, 2014-15 शोधसंहिता

प्रातिपदिकार्थसूत्रे वचनग्रहणमावश्यकं न वा?

डॉ.सि.एस्.एस्.नरसिंहमूर्तिः

स्वाभिप्रायाविष्करणे भाषापेक्षयाऽनुत्तमं साधनं किमपि लोके न विद्यते। तादृश्याः भाषायाः संस्काराय व्याकरणादृते नान्यः पन्थाः दरीदृश्यते। व्याकरणं हि पदानां साधुत्वं बोधयतीति निर्विवादम्। तानि च पदानि द्विधा विभक्तानि –1)सुबन्तानि 2)तिङन्तानि इति। तत्र सुबन्तानि पदानि – प्रथमान्तानि, द्वितीयान्तानि,तृतीयान्तानि,चतुर्थ्यन्तानि, पञ्चम्यन्तानि, षष्ठ्यन्तानि, सप्तम्यन्तानि, अव्ययानि,उपसर्गाः,निपाताः इत्याख्या बहुधा व्यभज्यन्त। सम्प्रति प्रथमायाः कोऽर्थः? इति विचारयामः।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (2.3.46) इति हि प्रथमाविधायकं पाणिनीयम्। सूत्रमिदम् अनभिहिते (2.3.1) इत्यधिकारे वर्तते। अतस्तदधिक्रियते। प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च प्रातिपदिकार्थलिङ्गपरिमाण–वचनानीति इतरेतरयोगद्वन्द्वः। मात्रशब्दस्य चावधारणार्थः। प्रातिपदिकार्थलिङ्गपरिमाणवचनान्येव प्रातिपदिकार्थलिङ्गपरिमाण–वचनमात्रम्। प्रातिपदिकार्थनिर्णयविषये बहुधा भाष्ये व्यचार्यत। यथा–

> एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
> नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः॥[1]

कस्यचित्सुबन्तपदस्योच्चारणे जातिव्यक्तिलिङ्गसंख्याकारकाणामर्थानां प्रतीतिः सर्वानुभवसिद्धा। तत्र कियान् भागः प्रकृतिवाच्यः? प्रत्ययवाच्यः कियानित्यत्र विवदन्ते शास्त्रकाराः। कथञ्चिज्जातिव्यक्त्योः प्रकृतिवाच्यत्वं बहुभिरङ्ग्यक्रियत। आह च भाष्यकारः पस्पशाह्निके–न ह्याकृतिपदार्थकस्य

Journal of Kavikulaguru Kalidas Sanskrit University, Ramtek ISSN No. 2277-7067

द्रव्यं न पदार्थः इति, न हि द्रव्यपदार्थकस्य आकृतिर्न पदार्थ इति न, उभयोरुभयं पदार्थः इति। अत्र सूत्रे लिङ्गादिग्रहणाच्च प्रातिपदिकार्थपदेन जातिव्यक्त्योरुभयोरेव ग्रहणमिति निश्चीयते। अवोचच्च काशिकाकारः 'प्रातिपदिकार्थः सत्ता' इति। तत्र सत्तेति प्रवृत्तिनिमित्तोपलक्षणमिति शब्देन्दुशेखरे नागेशभट्टोऽवर्णयत्।

अत्राधिकृतस्यानभिहित इत्यस्य क्वान्वयः? इति सम्प्रति परिशीलयामः। सूत्रेऽत्र प्रातिपदिकार्थलिङ्गपरिमाणवचनानां प्रतीतिः विद्यते। तत्र प्रातिपदिकार्थ इत्यनेनानभिहिताधिकारोऽन्वेति चेद् अनभिहिते प्रातिपदिकार्थे प्रथमा भवतीति सूत्रार्थो लभ्येत। प्रातिपदिकादेव हि प्रत्ययः कर्तव्यः खलु, अतस्तदभिहितत्वमेव विद्यते अनभिहितत्वन्तु दुर्लभमेव। अतोऽसम्भवादेव न सम्बध्यते। लिङ्गेन सम्बन्धे 'अनभिहिते लिङ्गे प्रथमोत्पद्यत इति सूत्रार्थः स्यात्। तदपि दुर्लभ एव। नियतलिङ्गाः, अनियतलिङ्गा वा भवन्तु, कस्यचिल्लिङ्गस्य प्रतीतिस्तु भवत्येव। अतोऽत्रापि नान्वेति। परिमाणेन सम्बन्धे 'अनभिहिते परिमाणे प्रथमा भवतीति सूत्रार्थो भवेत्। यद्यपि सर्वाणि प्रातिपदिकानि यत्किञ्चित्परिमाणबोधकान्येव तथापि परिमाणत्वेन रूपेण परिमाणबोधकानि न भवन्ति। अतोऽत्रापि असम्भवादेव न सम्बध्यते। वचनेन सम्बन्धे 'अनभिहिते वचने प्रथमा भवतीति सूत्रार्थो लभ्यते। वृक्षः, प्लक्षः इत्यादिषु संख्यायाः अनभिहितत्वमस्ति। एकः, द्वौ इत्यादिषु संख्याया अभिहितत्वमस्ति। अतः अनभिहितसंख्याबोधकेषु वृक्षादिष्वेव प्रथमा प्रवर्तेत, नत्वभिहितसंख्याबोधकेषु एकद्व्यादिषु। अतः संख्याबोधकेषु एकद्व्यादिषु प्रथमासाधनार्थं सूत्रे वचनग्रहणमावश्यकमिति पूर्वपक्षेऽत्रापि संख्यानभिहितैवेति, एकद्व्यादिषु प्रकृत्या विभक्त्यन्ताद्या संख्या बोध्यते सा संख्या न बोध्यत इति विषये भाष्यकारः चत्वारि समाधानानि सूचयामास। तद्भाष्यं भर्तृहरिणा वक्ष्यमाणरीत्या व्यख्यायि च। ते च आशयाः यथाशास्त्रमत्र निरूप्यन्ते–

Vol. IV, 2014-15 शोधसंहिता

1. अथ सन्ति, ममापि सन्ति। तेष्वनभिहितेषु प्रथमा भविष्यति।। इति। अनभिहिते इति सूत्रारम्भवादिनं प्रति सूत्रप्रत्याख्यानवादी दोषमाह– संख्या विभक्त्यर्थः। अभिहिते प्रथमेति खलु तव सिद्धान्तः। एको द्वौ बहवः इत्यत्रैकत्वद्वित्वादीनां प्रातिपदिकेनैवोक्तत्वात् प्रथमया भाव्यमिति।

तत आरम्भवादी परस्य तुल्यं दोषमाह– विभक्त्यर्थेषु कर्मादिषु प्रत्ययोत्पत्तावेकत्वादयो निमित्तत्वेनोपादेयाः। कर्मण एकत्वादावेकवचनादीति। तत्र वृक्ष इत्यादौ प्रकृत्यर्थव्यतिरेकेणैकत्वादिनां सत्त्वात्तत्र प्रथमायाः सिद्धावपि एक इत्यादौ प्रातिपदिकार्थव्यतिरेकेण एकत्वादीनामभावाद् भवतोऽपि मते प्रथमया न भाव्यमिति।

आरम्भवादी वदति अथ सन्तीति – प्रत्याख्यानवादिनस्तव मते तद्व्यतिरेकेण एकत्वादीनि सन्तीत्यभ्युपगम्यते, ममापि = आरम्भवादिनो ममापि, तानि सन्ति, अतो न दोष इति। तथा च एक इत्यत्र द्वे एकत्वे स्तः। एकस्यैकत्वस्य प्रकृत्याऽभिधानेऽपि द्वितीयैकत्वस्याभिधानाय प्रथमा प्रवर्तते, द्वितीयमेकत्वं प्रचिततत्वरूपं द्वित्वोत्पादनसमर्थं भवति। हरिः भाष्याशयमेवमवर्णयत्–

निमित्तमेक इत्यत्र विभक्त्या नाभिधीयते।
तद्गतस्तु यदेकत्वं विभक्तिस्तस्य वर्तते।।[2]

एकस्य प्रचयो दृष्टः समूहस्य द्वयोस्तथा।
निमित्तव्यतिरेकेण संख्यान्या भेदिका ततः।।[3] इति।

एक इत्यत्रास्ति एकत्वद्वयम्। तत्रैकमेकशब्दस्य प्रवृत्तिनिमित्तभूतम्, एकशब्दरूपप्रातिपदिकवाच्यम्, अपरन्तु एकत्वं सुविभक्तिवाच्यम्। तत्र प्रवृत्तिनिमित्तरूपमेकत्वं सुविभक्त्या नाभिधीयते, एकशब्देनोक्तत्वात्, उक्तार्थानामप्रयोगात्।

निमित्तम् एकशब्दप्रवृत्तिनिमित्तम् । यथा शतमित्यत्र प्रवृत्तिनिमित्तं शतसंख्या । अन्या च विभक्तिवाच्या प्रातिपदिकार्थगतैकत्वसंख्या । तथैक इत्यत्रापि प्रवृत्तिनिमित्तविभक्तिवाच्ये द्वे एकत्वे स्तः । तत्र प्रवृत्तिनिमित्तात् भिन्नस्यैकत्वस्य प्रकृत्यानभिधानात्तद्‌बोधनाय प्रथमा प्रवर्तते । द्वयोरपि तयोः ब्राह्मणौ द्वावित्यादाविवैकरूपेणैव भानान्न बोधावृत्तिरनुभवविरोधो वा न ।

संख्यायाः भानं द्विधा शास्त्रकारैः प्रादर्शि – 1. प्रचितः = समुच्चितः 2. अप्रचितः इति । द्वित्वाद्युपजननयोग्यत्वं हि प्रचितत्वम् । अयमेकः अयमेकः = इमौ द्वौ इति । एकस्य पदार्थस्यारोपेण समुच्चीयमाने प्रचयः = समुच्चयः दृष्टः । यथा – 1+1=2.

एकस्यान्यपदार्थसहभावरूपे समुच्चये सति द्वित्वादिसंख्याः जायन्ते । धर्मिसमुच्चयश्च धर्मसमुच्चयं विना न सम्भवतीति एकत्ववतः समुच्चय एकत्वस्यापि समुच्चय इति रीत्या एकत्वभेदो व्यवहारे दृष्टः । प्रातिपदिकेन तावत् प्रचिताप्रचितसाधारणमेकत्वमवगम्यते । विभक्तेस्तु प्रातिपदिकार्थे अप्रचितैकत्वरूपस्य विशेषस्य निश्चयः । विभक्तौ सत्यामेव पदत्वसम्पत्त्याऽर्थस्य परिसमाप्तेः । एक इत्यप्रचितमिदमेकत्वमिति प्रत्ययात् ।

अत्र व्याख्याने हेलाराज एवमाह– यद्येवं प्रचितविषये एकत्वे विभक्तिर्न स्याद् एकश्चेति । नैतन्न्याय्यम्, साधारणे एकत्वे प्रातिपदिकवाच्ये विभक्तिर्विशेषं द्योतयतीत्युच्यते । तथा च विभक्त्यात्र द्वित्वाद्युपजनहेतुतामप्रतिपद्यमानम्– प्रचितमेवैकत्वमावेद्यते । पश्चात्तु पदार्थे पर्यवसिते च शब्दः प्रचयं द्योतयति पदार्थपृष्टपातिनाम्, न तु प्रातिपदिकार्थगतम् । प्रातिपदिकार्थप्रचयविवक्षायां हि सहविवक्षाविषय एकशब्दप्रयोग इति ।

तस्यायमाशयः – प्रातिपदिकेन प्रचिताप्रचितसाधारणमेकत्वमभिधीयते । विभक्त्या त्वप्रचितमेकत्वम्, चकारेण तु पदार्थगतमेकत्वमिति । सहविवक्षाविषये प्रातिपदिकार्थप्रचयविवक्षायां ह्येकशब्दप्रयोग एव न भवति । एकश्चैकश्चैकाविति ।

किन्तु तत्रापेक्षाबुद्ध्या द्वित्वोत्पादनाद् 'द्वौ' इति प्रयोग एव भवतीति न तत्रापि अस्या विभक्त्यनुत्पत्तिलक्षणाया आशङ्काया अवकाश इति । आह च भाष्यकारः – 'संख्याया अन्यपदार्थत्वात्' इति । तस्यायमाशयः –एकश्चैकश्चेमौ द्वौ इत्यत्र द्वित्वसंख्यायाः द्विपदार्थत्वात् 'एकौ' इति प्रयोगो न भवतीति एकशेषस्य प्रत्याख्यानमकरोत् । यतस्तत्समानार्थकस्य द्वौ इति शब्दस्य सत्त्वात् । अपेक्षाबुद्ध्येव तत्सिद्धेः । प्रातिपदिकेन तावत् प्रचिताप्रचितसंख्या बोध्यते – यथा एकपुत्रः इत्यत्र । अत्र प्रत्ययस्य लुप्तत्वेन प्रचितसंख्याभावात् । एवमेव द्वौ, बहवः इत्यत्र उद्भूतावयवभेदसमूहप्रतीतिर्विभक्त्या, तदभावे द्विपुत्रः, बहुपुत्रः इत्यादावनुद्भूतावयवभेदसमूहरूपद्वित्वादिभानम् । आह च मणिकारः – सम्भेदे नान्यतरवैयर्थ्यम् इति । सम्भेद इत्यस्य एकस्यैवार्थस्य शब्दद्वयेन बोधनमित्यर्थः । प्रातिपदिकेन केवलेन संख्याया अनभिधानाद्विभक्तिः प्रवर्तते । संख्यायाः प्रातिपदिकेनाभिदानादप्राप्तौ वचनग्रहणमिति न, बोध्यमानायाः समग्रायाः अनुक्तेः ।

2.अथ वोभयवचना ह्येते द्रव्यं चाहुर्गुणं च । यत्स्थोऽसौ गुणस्तस्यानुक्ता एकत्वादय इति कृत्वा प्रथमा भविष्यतीति । अष्टके 'परश्च (3.1.2)' इति सूत्रेण प्रत्ययपरैव प्रकृतिः प्रयोक्तव्या, न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः इति न्यायेनेति नियम्यते । अत उभौ मिलित्वैवार्थं ब्रूतः । अतः केवलया प्रकृत्या तदर्थो न बोध्यते । अतस्तदर्थबोधनार्थं प्रत्ययस्य निष्पत्तिरनिवार्या । आह च हरिः –

त्वेकमपि चैकत्वं विभक्तिश्रवणादृते ।
नोच्यते तेन शब्देन विभक्त्या तु सहोच्यते ।।[4] इति ।

एक इत्यत्र प्रातिपदिकेन विभक्त्या चैकमेवैकत्वमुच्यते । तदेकमपि चैकत्वं विभक्तिप्रातिपदिकाभ्यामभिधीयमानं विभक्तिश्रवणादृते = विभुक्तिश्रवणाभावे, तेन शब्देन = एकेति प्रातिपदिकेन, नोच्यते=नाभिधातुं शक्यते, विभक्त्या सह तूच्यते तदेव तेनेति ।

विभक्तिश्रवणादृते प्रकृत्या संख्यायाः प्रतीतिर्न भवति, विभक्त्या सहैव बोध्यते। न केवलेति समयानुरोधेनैकादिशब्देभ्यो विभक्त्युत्पत्तेस्सम्भवात् प्रातिपदिकार्थसूत्रे वचनग्रहणं न कार्यम्। शास्त्रे 'सुपो धातुप्रातिपदिकयोः' इत्यनेन लुग्विधानात् 'प्रत्ययाभावेऽपि प्रातिपदिकमात्रेणार्थो बोध्यते' यथा – राजेत्यादिषु स्थलेषु हङ्याभ्यो दीर्घादित्यादिना लोपेऽपि बोधदर्शनात्। विरुद्धविभक्त्या न केवलेति नियमपरिपालनापेक्षयाऽनुवादविभक्त्या तत्परिपालनं न्याय्यमिति नियमादत्रैकशब्दान्न द्विवचनबहुवचने उत्पद्येते।

3.अथ वा संख्या नामेयं परप्रधाना, संख्येयमानया विशेष्यम्। यदि चात्र प्रथमा न स्यात् संख्येयमविशेषितं स्यादिति। व्याख्यातं च हरिणा –

अन्वयव्यतिरेकौ न यदि स्याद् वचनान्तरम्।
स्यातामसति तस्मिंश्च प्रकृत्यर्थो न कल्प्यते।।[5] इति।

वृक्षः,वृक्षौ,वृक्षाः इत्यादौ प्रकृतिप्रत्यययोरन्वयव्यतिरेकौ स्तः, तत्तदर्थनिर्णायकौ। यदि वृक्षशब्दाद् वचनान्तरम्=एकवचनातिरिक्तं वचनं द्विवचनादिकं स्यात्, तदैव तौ स्याताम्। एकः इत्यादौ तस्मिन् वचनान्तरेऽसति चान्वयव्यतिरेकानिश्चयात् प्रकृत्यर्थाद् विवेकेन न कल्प्यते=नावधार्यते। प्रकृतिप्रत्ययसमुदायवाच्य एवैकत्वाद्याः संख्याः। केवलया प्रकृत्या सोऽर्थो न बोध्यते, अतः केवलप्रातिपदिकेनैकत्वस्यनभिधानात् तदभिधानायैकादिशब्देभ्य एकवचनादिकं प्रवर्तते। एकत्वादीनामर्थानां समुदायवाच्यत्वमेवेत्यत्र 'अर्थवत्सूत्रस्थं भाष्यं प्रमाणम् – तत्र हि वृक्ष इत्यादिप्रातिपदिकानां प्रत्ययसहितानामेवार्थबोधकत्वं न केवलानामतोऽर्थवत्त्वनिबन्धनं प्रातिपदिकत्वं वृक्षादीनां न सिद्ध्यतीत्याशयेन कृतस्य 'अर्थवत्ता नोपपद्यते केवलेनावचना'दिति पूर्वपक्षस्य 'सिद्धं त्वन्वयव्यतिरेकाभ्यां' इति समाहितम्। भूवादयो धातवः (1.3.1) इति सूत्रे भाष्येऽपि भाष्यकार आह– कथं पुनर्ज्ञायते अयं प्रकृत्यर्थः अयं प्रत्ययार्थ इति प्रश्ने 'सिद्धं त्वन्वयव्यतिरेकाभ्याम्' इत्युक्तम्। वृक्षः,वृक्षौ, वृक्षाः, घटः,घटौ, घटाः इत्यादौ

प्रकृतिप्रत्यययोरन्वयव्यतिरेकयोः दर्शनादयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति निर्णेतुं सुशकम्। एकः,द्वौ,बहवः इत्यत्र तु वचनान्तराभावात् व्यतिरेकाभावेन अन्वयस्याप्यनिश्चयात् प्रकृत्यर्थः प्रातिपदिकेन नाभिधीयते। अतः प्रकृत्यैकत्वादीनामनभिधानात् तद्बोधनाय विभक्तिरुत्पद्यते। एवं च वचनग्रहणं न कार्यम्। पूर्वत्र परिहारे प्रकृत्यर्थानुवादकत्वमभिहितम्। सत्यपि प्रकृत्यर्थे यथायथं तदर्थानुवादकत्वेन वचनानामुक्तत्वात्। इह तु साधारणार्थत्वमभिमतं प्रकृतिप्रत्ययसमुदायवाच्येनार्थेन . संख्येयविशेषस्योक्तत्वादिति परिहारयोर्भाष्योक्तयोर्विशेषः।

4.अथ वा वक्ष्यति तत्र वचनग्रहणस्य प्रयोजनम् – उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यादिति। तच्च भाष्यं हरिणैवं व्याख्यातम्–

एकत्वमेक इत्यत्र शुद्धद्रव्यविशेषणम्।
सगुणस्तु प्रकृत्यर्थो विभक्त्यर्थेन भिद्यते।।[6] इति।

एक इत्यत्र द्वे एकत्वे, तत्रैकमेकत्वं प्रकृत्यर्थभूतं शुद्धद्रव्यविशेषणम्। सगुणस्तु प्रचिताप्रचितसाधारणैकत्वसंख्यानरूपगुणविशिष्टद्रव्यं तु प्रकृत्यर्थ एकशब्दार्थः। विभक्त्यर्थेन अप्रचितैकत्वरूपेण भिद्यते= विशिष्यते, व्यावर्त्यत इत्यर्थः। उभयवचना एवैते द्रव्यं चैवाहुर्गुणं च। यत् सोऽसौ गुणस्तस्यानुक्ता एकत्वादय इति प्रथमा भविष्यति। एते= एकत्वादयः शब्दाः, उभयवचनाः=विशिष्टद्रव्यवचनाः, तत्र विशेष्यतया द्रव्यमाहुः। प्रवृत्तिनिमित्ततया एकत्वादिगुणं चाहुः। तदेव व्याख्यातम् – यत् सोऽसौ गुणः= एकत्वादिसंख्यानरूपो गुणः, तस्यानुक्ता एकत्वादय इति प्रथमा भविष्यति। एकत्वेऽप्यस्ति एकत्वम्– एक एवायं घट इति। तथा एकत्वे द्वित्वमपि – एकश्चैकश्चेतीमौ द्वाविति। तथा एकत्वेऽपि बहुत्वं त्रित्वादिकं वा तथैवापेक्षाबुद्धिजन्यम्। तदत्रैकत्वगतस्यैकत्वस्यानुक्त्या एक इत्यत्र प्रथमा भवति।

अत्रायमाशयः– एकत्वेन विशेषणात् पूर्वं शुद्धस्य द्रव्यस्य शाब्देतरया मानस्या बुद्ध्या निर्ज्ञातस्य विशेषणभावापन्नमेक इति प्रातिपदिकेनाभिधीयते। एकशब्दो हि एकत्वविशिष्टं द्रव्यमेवाह– विंशत्यादिवत्। विंशत्यादयो हि कदाचित् संख्यानमात्रमाहुः – ब्राह्मणानां विंशतिः। कदाचित् संख्यानविशिष्टं द्रव्यमाहुः – विंशतिः ब्राह्मणा इति। एकशब्दस्तु संख्यानविशिष्टद्रव्यमेवाह, न तु एकत्वरूपसंख्यानमात्रमपि।

एकशब्दः एकत्वसंख्याविशिष्टद्रव्यबोधकः। तत्र संख्यान्तरव्यावृत्तये प्रत्ययवाच्यमेकत्वमन्वेति। तदर्थमेकादिशब्देभ्यः एकवचनादिकं प्रवर्तते। एवं च गुणोपसर्जनद्रव्यं प्रातिपदिकमभिधत्ते। द्रव्योपसर्जनस्तु विभक्त्या बोध्यते। यथा शौक्ल्यमिति गुणोपसर्जनद्रव्याभिधायिनः शुक्लशब्दात् द्रव्योपसर्जने तस्मिन्नेव भावप्रत्ययात्।

उपसंहारः –

इत्थं च चतुर्भिः प्रकारैः एकादिशब्देभ्यो विभक्तिं सम्पाद्य प्रातिपदिकार्थसूत्रे संख्यार्थकवचनग्रहणं प्रत्याख्यातुं शक्यत इति भाष्यकाराणां निगूढाशयः। इति शम्।

संदर्भसूची

1. भूषणसारे नामार्थनिर्णये प्रथमकारिका।
2. वाक्यपदीयम्–कारिका–27
3. तत्रैव –28
4. तत्रैव –29
5. तत्रैव –30
6. तत्रैव –31

संदर्भग्रन्थसूची

1. नागेश भट्टः,वैयाकरणसिद्धान्तलघुमञ्जूषा, पेरि सूर्यनारायणशास्त्री
2. पतञ्जलिः,**महाभाष्यम्** श्री भार्गवशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान – दिल्ली
3. भट्टोजी दीक्षितः, **वैयाकरणसिद्धान्तकौमुदी**, चौखम्बा संस्कृत ग्रन्थमाला, वाराणसी,1996
4. पं. रामप्रसाद त्रिपाठी, **वाक्यपदीयम्** , चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2001
5. कौण्डभट्टः ,**वैयाकरणभूषणसारः** , निर्णयसागरप्रेस , मुम्बई,1995

------------- ७♦७ -------------

Teaching Strategies based on Integration of Multiple Intelligences and Learning Styles

- Dr. Mrs. Indumati T. Bharambe

ABSTRACT

Howard Gardner's theory of Multiple Intelligences was introduced in 1983. Originally the theory accounted for seven separate intelligences. Subsequently, with the publishing of Gardner's Intelligence reframed in 1999, two more intelligences were added to the list. The intelligences are Verbal/Linguistic,Logical/Mathematical, Visual/Spatial, Bodily Kinesthetic, Musical, Interpersonal, Intrapersonal, Naturalistic intelligence. Gardner's theory challenges traditional, narrower views of intelligence.

According to Gardner's theory on intelligence encompasses the ability to create and solve problems, create products or provide services that are valued within a culture or society. Teachers have always observed that students had different strengths and weaknesses in the classroom. Gardner's research provides direction how to improve student's ability in any given intelligence. So, teacher should plan the lesson in such a way that students meet the needs of variety of intelligences and search the means of providing various resources. He can implement the theory into his/her classroom activities.

In general learning style refers to the uniqueness of how each learner received and processes new information through their senses. Learning style is defined as the cognitive, affectivecomposite of characteristic and physiological factors that serves as relatively stable indicators of how a learner perceives, interacts with and responds to the learning environment. Each person is born with certain preferences towards particular styles, but culture, experience and development influence these preferences. The common learning styles are visual, aural reading/writing and kinesthetic/tactile, logical, social and solitary. Most people learn through these styles but have certain strengths & weakness in a specific style.

Once a person's learning style is ascertained, accommodations can be made to increase academic achievement and creativity, as well as improve attitudes towards learning. This paper attempts to integrate learning styles and multiple intelligences in learning an English poem. For this purpose requirement of intelligence is analyzed and various activities are selected accordingly. That means learning experiences are provided as per the requirement of intelligence and students can learn the poem by his/her learning preferences and needs.

INTRODUCTION

Traditionally mainly linguistic and logical teaching methods are used in the classrooms. It also uses a limited range of learning and teaching techniques. So the classroom learning becomes boring and ultimately various intelligences are not developing up to apt. Thereis a need of new teaching and learning techniques that the learning becomes a joyful activity. Integration various learning styles and multiple intelligences is the new and effective technique for teaching and learning.

A critical analysis of the process of cognitive based learning theories reveals that besides many factors such as visual stimulus, verbal stimulus, functional and learning interaction, attention, intelligence, motivation, reflection, cognitive engagement, working

memory, long term storage etc. Learning style, a way in which an individual perceives, receives processes, understands and retrieves information, seems to be an important element for effective learning (Anil Kumar, 2010). Therefore, for effective learning teaching should be designed and the learning preferences so that various intelligence can be nourished.

MULTIPLE INTELLIGENCES

Dr. Howard Gardner, a Professor of Education at Harvard University and other researchers began project zero in 1970 to investigatehuman potential. They work continuously for several years on it and they found some results based on functions of brain. Gardner's research consisted of brain research & interviews with stroke victims, prodigies, and individuals with autism. Based on his findings, Gardner introduced the 'Theory of Multiple Intelligence' in 1983 with his book 'Frames of Mind'. Gardner's theory Challenges traditional, narrower views of Intelligence.

Previously accepted ideas of human Intellectual capacity contained that the individual's intelligence is a fixed entity throughout his life time and that intelligence can be measured through an individual's logical and language abilities. According to Gardner's theory, intelligence encompasses the ability to create & solve problems, create products or provide services that are valued within a culture or society. Gardner's theory is based upon research related to eight criteria covering neurological, evolutionary, cognitive, psychometric, developmental & psychological factors related to intelligence.

According to Gardner (1990) all human beings possess all intelligences in varying amounts. Each individual has different intellectual composition. These intelligences are located in different

areas of human brain and either work independently or collectively. All human beings possess these eight intelligences.



Figure No 1: Multiple Intelligences

1. Verbal / Linguistic Intelligence:

Verbal/Linguistic intelligence refers to an individual's ability to understand and manipulate words & languages. This includes reading, writing, speaking and other forms of verbal and written communication. The people with this intelligence are verbally able to write, explain, convince, and express themselves. They enjoy writing and creating with words. Thus understand meaning of words easily. Teachers can enhance their student's verbal/Linguistic Intelligence by having them keep journals, play work games and by encouraging discussion.

2. Logical/Mathematical Intelligence:

Logical/Mathematical Intelligence deals with an individual's ability to collect data, organize,conclude & predict it. Peoplewith this intelligence learn best through numbers, reasoningand problem solving. These are oriented toward logical & abstract thinking. They like to play strategy games and to solve mathematical problems. Teachers can strengthen this intelligence byencouraging the use of

critical thinking activities, logical puzzles, use of sequential presentation ofsubject matter.

3. Visual/Spatial Intelligence:

Visual/Spatial intelligence refers to the ability to form and manipulate a mental model. People having this kind of intelligence tend to learn most readily from visual presentation such asmovies, pictures, videos, demonstration. They are very imaginative. They like to sketch, paint orsculpt their ideas. They are able to read, interpret consonant diagrams & maps. They are also good at reading & constructing maps and discerning objects as they might appear in three dimensional spaces.Teacher canstrengthen this intelligence by utilizing charts, graphs, diagrams, graphic organizers, videotapes,computer graphics software etc.

4. Bodily/kinesthetic Intelligence:

It deals with the abilities & skills involved in using body or parts of body to perform skillfuland purposeful movement and abilities to control one's body movements and to handle objectsskillfully. Peoplehaving this intelligence are able to manipulate and control objects. These children are adept at creating and interpreting gestures and often good at communicating with others, reading other's body languages. They express their ideas through movements. They learn best through physical activities such as dance, hands-on, touching, feeling, facial expressions. They enjoy all type of sports& physical activities. Teachers can foster this intelligence through the use of movements, dance, facial expressions and all physical activities.

5. Musical Intelligence:

It is an ability to understand, create, appreciate and interpret

musical pitch, timbre, rhythm, tones and the capability to compose music. The people with this intelligence learn best through sounds. They are able to use inductive & deductive reasoning and identify relationship in data. Teacher can provide students with audio-visual recorders to capture their musical expressions. He can ask them to choose appropriate music to go with the slide show, multimedia etc.

6. Interpersonal:

It consists of the abilities to understand, interpret and respond to the moods, emotions, motivators and actions of others. It relives good communication & interaction skills and ability to show empathy towards the feelings of other persons. Peoplewith this intelligence learn best through interaction with other people through discussion, group activities, social activities. Teachers can encourage the growth of interpersonal intelligence by teaching which includes group work, group discussions, and cooperative learning activities.

7. Intrapersonal Intelligence:

It is the ability to know oneself. It is an ability to understand one's own emotions, motivations and aware of own strengths & weaknesses. Peoplehaving Intrapersonal Intelligence learn best through meta-cognitive practices such as getting in touch with their feeling & self motivation. These persons are good at setting & pursuing goals & assessing work and good at working independently. Teacher can assign reflective activities for fostering Intrapersonal Intelligence. He can encourage by using brain storming, journals, simulation games, role play etc.

8. Naturalistic:

Naturalistic intelligence as noted by Hyun (2000) involves the ability to understand and work effectively in the nature.

Peoplewith this intelligence are able to recognize & classifies plants, animals & minerals. They are aware of species such as flora & fauna around them. People with naturalistic intelligence also show expertise in the recognition and classification of plants and animals (Hyun; 2000).these children benefit from learning outdoors (Nolen; 2003). These persons can learn best through the interaction with the natural environment around them. Teachers can foster this intelligence by using relationships among systems of species & classification activities. They can also planned the activities such as observing nature, labeling & mounting specimens from nature, noticing changes in the environment, sorting articles from nature, nature hikes, fieldtrip in nature & caring for pets (Hyun; 2000). Teacher can organize field trip in which students can observe & record the things in the nature and thus they enjoy it.

The multiple intelligences described are a better way for teachers to understand and accommodate different learning styles (Nolen, 2003 cited in Johnson, 2007). Multiple intelligence helps teachers make content accessible to every learner and enable students to make connections, build their own theories, and explore the content in variety of ways.

The researches of Johnson, M. (2007), Moren, S., Kornhaber, M. and Gardner, H. (2006), Cromwell, R. R., Croskery, B. (1994), Fluellen, J. (1998), Coleman, K. etal (1997), Dare, M. etal (1997), Greenhawk, (1997), and Hickey, (2004) were reviewed. The review of related literature of multiple intelligence are at school education level indicates that the improvement of student achievement. The researchers also indicate that a number of positive outcomes including increased student confidence, intrinsic motivation, engagement and performance on standardized tests. When students understand and apply their personal intelligences, they become more

connected to their learning and invested in their educational experiences (Johnson, 2004). The studies also indicate that increased student engagement leads to improved student participation and less discipline problems.

LEARNING STYLES

Learning Styles are various approaches or ways of learning. Learning Style is a consistent pattern of behaviour & performance by which an individual approaches educational experiences. Stewart & Felicetti (1992) define learning style as these "educational conditions under which a student is mostly likely to learn". It serves as relatively stable indicators of how learners perceives, interact with & responds to the learning environment. Thus learning styles are not really concerned with what learners learn, but rather 'how' they prefer to learn.The term "learning styles" is commonly used throughout various educational fields and therefore, has many connotations. In general, it refers to the uniqueness of how each learner receives and processes new information through their senses.Each person is born with certain preferences toward particular style, but culture, experience, and development influence these preferences.

The common learning styles are visual, aural reading/writing and kinesthetic/tactile, logical, social and solitary.Most people learn through all modalities, but have certain strengths and weaknesses in a specific modality. Some people have an equal propensity for more than one style, which is titled as the multimodal style. This preference can be determined through various testing instruments. Once a person's learning style is ascertained, accommodations can be made to increase academic achievement and creativity, as well as improve attitudes toward learning. The types of learning styles are as follows.



Figure No 2: Types of Learning Styles

1. The Visual Learning Style:

Visual learners process information most effectively when the information is seen. Depictions can include charts, graphs, flow charts, and all the symbolic arrows, circles, hierarchies and other devices that instructors use to represent what could have been presented in worlds. These learners think in pictures and have vivid imaginations. Most people are classified as visual learners.

2. The Aural Learning Style:

Aural learners process information most effectively when spoken or heard. These learners respond well to lectures and discussions and are excellent listeners. They also like to talk and enjoy music and dramas. When trying to recall information, aural learners can often "hear" the way someone told them the information.

3. The Verbal Learning Style:

Reading/Writing learners process information most effectively when presented in a written language format. This type

of learner is benefited by the instruction using the blackboard to accent important points or provides outlines of the lecture material. When trying to recall information, reading/writing learners remember the information from their "mind's eye." Many academics have a strong preference for the reading/writing style.

4. The Physical/Kinesthetic Learning Style:

Physical learners process information actively through physical means. Kinesthetic learning refers to whole body movement while tactile learning refers only to the sense of touch. These learners gesture when speaking, are poor listeners, and lose interest in long speeches. Most students that do not perform well in school are kinesthetic/tactile learners. The crux of this learning style is that the learner is connected to real situations through experience, example, practice, or simulation.

5. Logical Learning Style:

The learner prefers to learn through logic, reasoning and system.They like to solve puzzles, Sudoku, maze learning. They are able to guess the sequence in learning points, relationships etc.

6. Social Learning Style:

Learner prefers to learn in group and with other people. They are extrovert.

7. Solitary Learning Style:

Solitary learners process information actively through the self-study alone.

The children with different learning style prefer different learning environment, learning environment consist of all those physical sensory elements such as a lighting, colors, sound, space,

furniture and so on. Learning environment should be designed in such a way that learning may proceed with minimum stress and maximum effectiveness. Learningenvironment is made up to an arrangement of teaching strategies and methods, learning material and media. The learning environment represents the current temporal, spatial, social learning situation and includes relevant cultural content (Khan, Suhail, 2010).

Each person prefers different learning styles and techniques. Everyone has a mix of learning styles. Some people may find that they have a dominant style of learning with far less use of the other styles. Different styles are used in different circumstances. There is no right mix. Russo (2002) reported that the findings of an early meta-analysis of 42 experimental studies conducted at 13 different universities between 1980 and 1990 indicated that academic achievement was statistically increased when instructional elements were compatible with individuals learning style preferences. Bajrakta, Revic, Hall and Fullick (2003) in their research findings suggested that students benefit from the learning materials being adopted to suit their learning preferences.

The results revealed that students have obvious different preferences for lesson presentation type. Garland and Martin (2005) were of the view that when designed online courses that learning style of all students must be considered from the above students of appears that learning style of the learner plays an important and crucial role in the process of learning. Therefore, there is urgent need to include learning style of the learner while designing teaching learning strategies.

In present study, the researcher has selected the poem 'The Snare' included in VIII std. English textbook in Maharashtra State. The main theme of the poem is as follows.

When the little boy is wandering in meadow, he hears the crying of rabbit catches in a snare. The poet says that a rabbit is

caught in a snare and he is crying painfully. The little boy hears the cry of rabbit again & again but cannot see him. The rabbit is calling again & again for help. He is frightened and his cries fill the atmosphere with the feeling of fear. Rabbit is crying with his wrinkled face. He is crying for help. But boy is unable to find the place where the rabbit's paw is catched in the snare.

The selected poem is given below.

The Snare

I hear a sudden cry of pain!
There is a rabbit in a snare,
Now I hear the cry again,
But I cannot tell from where......

But I cannot tell from where,
He is calling out for aid;
Crying on the frightened air,
Making everything afraid.

Making everything afraid,
Wrinkling up his little face,
As he cries again for aid;
And I cannot find the place!

And I cannot find the place!
Where his paw is in the snare,
Little one! Oh, little one!
I am searching everywhere.

Keeping in mind the characteristics of the person with particular intelligence and learning style preferences and the main theme of the poem, the learning experiences & learning activities are suggested in while learning the poem. These are based on Gardner's work and work of David Lazear, Bob Samples and Thomas Armstrong.

TABLE NO. 1

Learning Activities based on Preferences related to Multiple Intelligence & Learning Styles

Intelligence Area	Learns best through	Learning Styles	Learning Preferences	Learning activities
Verbal / Linguistic	Hearing and seeing words, speaking, reading, writing, discussing and debating	Reading/ writing learning style	Write, read, tell stories, talk, memorize, work at solving puzzles	Reading of poem loudly, listening of tape, writing & reading new words,
Mathematical/ Logical	Working with relationships and patterns, classifying, categorizing, working with the abstract	Logical learning style	Question, work with numbers, experiment, solve problems	Trip to the forest, visit to garden, Guess the meaning of snare, tell the meaning frightened air, asking the question 'is everything really afraid?' Suggest the end of story/poem.
Visual / Spatial	Working with pictures and colors, visualizing, using the mind's eye, drawing	Visual learning style	Draw, build, design, create, daydream, look at pictures	Asking question on imagination, observing video, try to write an end for this story. What are the feelings of poet about rabbit?
Bodily / Kinesthetic	Touching, moving, knowledge through bodily sensations, processing	Kinesthetic/Tactile learning style	Move around, touch and talk, body language	Role play on poem, Drama based on poem,
Musical	Rhythm, singing, melody, listening to music and melodies	Aural learning style	Sing, play an instrument, listen to music,	Singing a poem & playing with it, write the rhyming words in the poem,
Interpersonal	Comparing, relating, sharing, interviewing, cooperating	Aural/ Social learning style	Talk to person, have friends, join groups	Word games, group activity on guessing that where is the rabbit,
Intrapersonal	Work alone, having space, reflecting, doing self paced projects	Solitary learning style	Work alone, reflect pursue interests	Self paced imagination, what does the poet want to tell us through the line, 'is everything really afraid?' Ask the following questions: Why do you think that the rabbit is crying with pain? Why do you think that he could not find the rabbit?
Naturalistic	Working in nature, exploring living things, learning about plants and natural events	Kinesthetic/Tactile learning style	Be involved with nature, make distinctions	Trip to forest or field trip

SUMMARY

This type of lesson revolves around student created material. This lesson is allowing students to make choices. Gardner's multiple intelligence theory can help each individual in build upon strong and weak intelligences to become more productive human being. The theory encourages a shift from the more traditional understanding of intelligence to a more holistic perspective which validates and fosters each & every part of a person's mind. Teacher should encourage students to exercise their weaker intelligences and allow them to explore their stronger areas well. When teaching an individual, teachers should present the most difficult concepts in the preferred style. Easier concepts should be introduced in a different style. When teaching an entire class, teachers should use all learning styles in their presentations if they are wish to reach every student.

REFERENCES

- Anil, Kumar (2010). **Learning Style based Multimedia Designs Research & Developments in Education.** CASE the M.S. University of Baroda P-35-41.
- Dunn, R. and Dunn, K. (1978). **Teaching students through their individual learning style.** Reston Publishing Company, Reston, VA.
- Emily, Giles, Sarah, Pitre, & Sara Womack (2012) **Multiple Intelligence and Learning Styles.**File://C:/DOCUME~1/ADMIN~1.JAL/LOCALS~1/Temp/CK3V7CBW.htm, 27/07/2012.
- **Howard Gardner's Multiple Intelligence Theories Model** http://www.businessball.com/howardgardnermultiple intelligence.

- http://wwweric.ed.gov/ERICDocs/data/ericdocs2sql/content_storage_01/0000019b/80/15/07/18.pdf.
- Khan, Suhail Ahmed & /Veena Kumari (2010). **A Study of the Preferences for Learning Environment with respect to the Learning Styles of Class IX Students of English Medium Schools in Bhopal City.** Indian Journal of Teacher Education Anweshika, N.C.T.E., New Delhi. P-72-77. (Vol.711),
- Mu, S. & Ding, X. (2005). **Cognitive Style Theory based Design and Implementation of online Course**. ICDE International conference, 2005 www.ignou.ac.in/icde2005/pdfs/theme2pdf/theme2_118pdf
- Poornima, R & Reddy, G. Lokanadha (2011). **Multiple Intelligences Theory Educational Implications.** Edutracks, Vol. 10 (6) P-13-17.
- Rajendran, M. (2008). **A Study on Multiple Intelligence Level of Primary Teacher Trainees in Tamil Nadu.** CASE, The M.S. University of Baroda PP-20 to 32.
- Ranganathan, R & Rao, S.V. Lakshmana (2010). **Intervention of MI – Theory in Modern Teaching Apporach.** Edutracks, Vol. 10 (3), P-5-9.

Development of Human Houses in Vastu Shastra

DR. REMADEVI. V.

The origin of Vastu Shastra may have taken place well over thousands of years ago. The learned men of those days may not have lived in houses themselves but they most definitely dedicated their lives to the development of the science "Vastu Shastra" or "Vastu", as it is popularly known today. The principles of the science laid down during those days were based purely on the effect of sun rays during different times of the day. The observations and corrections made were noted and concluded only after in-depth screening of the situation.

Vastu is a part of Vedas, which are believed to be four to five thousand years old. Through penance and meditation yogas of that period acquired answers believed to have come from the cosmic mind itself to their questions. Hence Vedas are heeded with divine knowledge. The art of Vastu originates in the Stapatya veda, a part of the Atharva Veda.

It is used to be a purely technical subject and it was only confined to architects (Stapatis) and handed over to their heirs. The principles of construction, architecture sculpture etc. enunciated in the epics and treatise on temple architecture, have been incorporated in the science of Vastu. Its description is there in epics like Matsya Purana, Skanda Purana, Agni Purana, Garuda Purana and Vishnu Purana. There are some other ancient Shastras that

pass over the knowledge of Vastu Sastra to next generation like Vishvakarma Prakash, Samrangan Sutradhar, Kashyap Shilpashastra, Brihad Samhita and Praman Manjaree.

In the Mahabharata it is said a number of houses were built for the kings who were invited to the city of Indraprastha for the Rajasuya Yajna of KingYudhistira. Sage Vyasa says that these houses were as high as the peaks of Kailasa Mountains, perhaps meaning that they stood tall and majestic. The houses were free from obstructions, had compounds with high walls and their doors were of uniform height and inlaid with numerous metal ornaments. It is said that the site plan of Ayodhya, the city of Lord Rama was similar to the plan found in the great architectural text Manasara. References are also to be found in Budhist literature, or buildings constructed on the basis of Vastu. They contain references to individual buildings. Lord Budha is said to have delivered discourses on architecture and even told his disciples that supervising the construction of a building was one of the duties of the order. Mention is made of monasteries (Viharas) or temples, buildings which are partly residential and partly religious (Ardhayogas), residential storeyed buildings (Prasadas) multi storeyed buildings (Harmyas) and Guhas or residential buildings for middle class people.

The Vastu, the word "dwelling", is believed to be the residing places of god and man. According to its modern meaning it covers all buildings irrespective of their use like residences, industries, business establishments lodges, hotels etc. It is based on the five basic and essential elements, such as Vayu (air), Agni (Fire), Jal (water), Bhumi (earth) and Akasa (space), which are known as Panchabhutas. Every thing on earth is built from these elements.

General Characteristics Of Shala -House

Harmyas, Vimanas and Prasadas are also houses where higher people and rich people and the gods are housed. The word shala, with its characteristics of courts, chambers, rooms, porticos etc. as opposed to the storeys (Vimanas and Prasadas) is used. People living in Bharata Varsha, resided in forests, on the banks of rivers, on the mountains, and underneath the shady Nikunjas. Some purana texts say the first house on earth had the tree as its model[1]. Dr. Acharya in his Encyclopaedia of Hindu Architecture says Trees are stated to have supplied to the primitive men the model of his future house[2]. Shala (house) is stated to have been derived from Shakha (branch) because originally branches were arranged lengthwise, breadthwise, crosswise, up and down and thatched to make the first house.

Thus it is evident that shala primarily means a thatch of straw (Chala) for shelter of men or their cattle and stores. Later on this acquired more and longer denotation of such stalls and sheds. As time passed as its use was in great vogue, it came to mean a house in general (shalapati – house holder). Finally as is even today, it has come to mean a single section or a single room of a house as is clear from words like Agni shala, Patni Shala, Goshala, Vaji Shala, Gaja Shala etc. etc.

The Sutra literature embodying the earliest Vastu Vidya, fully supports this tree model of a primitive house. In the rituals the central part of the site called Vastu has been an object of especial veneration from the very earliest times. The existence of a central post as directed by Sutra writers[3] at this point has served as a motif for the dwelling places. And the idea of a central post inside the dwelling indicates that the primitive house was a construction over

and around this post. The shape of the construction seems to suggest a close resemblance of a shady tree which provided shelter to the primitive man from sun and rain at a time when house building was unknown[4].

The account of the origin of the house which we find in Bhoja's Samarangana – Sutradhara and corroborated by Markandeya, Vayu and Matsya Puranas and the importance attached to the central post as is evident from the rituals, suggests that the primitive building, devised on the model of a tree was one with a central post as the trunk and the tatches in all directions as the outstretched branches of a tree.

Tree as the model of a house is further supported by the classification of the pillars and other different parts of a tree. In the Manasara[5] the five main pillars are called Brahmakanta, Visnukanta, Rudrakanta, Sivakanta and Skandakanta. The word Kanta, as is used in the nomenclature of these pillars, is a later variation of the word 'Kanda'. Similarly the door jambs in practically all the manuals on the science of architecture are called Sakhas (the branches) from the use of branches of trees in their construction. Again the lintel of the door way was similarly called as 'Udumbara' evidently from the use of fig wood in making these pieces. Thus earliest connections of primitive dwellings which the tree appear all the more probable, as we find that the vegetable kingdom was the first to be utilised for all necessary materials of house building.

Shala – Houses have distinguished them as private houses, residential houses suitable abodes of the common man, the middle class people and the humble people who according to the stratification of society belonged to different casts and professions as opposed to the uncommon houses, the ostentatious buildings

and the extra-ordinary houses, the great edifices like temples – Prasadas, Vimanas, etc. best suited only to kings, to the rich and to the divinity.

Though from the point of view of the Sastra, a fulfledged code of house – architecture in relation to the common residential houses did not attain its maturity by the time of Samarangana Sutradhara, it nevertheless, cannot be said that this class of buildings did not exist in India. Numerous references in the Epics – Ramayana and Mahabharata, the Jatakas and Kautilya's Artha-Sastra illustrate the fact that these ordinary dwellings were undoubtedly similar to those which are found in the villages of India even today – thatched houses with wooden construction of the roofs and the masonry of mud-walls having verandah (Alinda) infront and the Kosthas (the shalas) all round the court.

Shala is used mostly in the sense of a house. Shalas imply both temples and residential buildings for Brahmanas, Ksatriyas, Vaisyas and Sudras. Their characteristic features as single building may be seen:-

शालायाः परितोलिन्दं पृष्ठतो भद्रसंयुतम् ।
पुरतो मण्डपोपेतम् ।।

Like Villages, Shalas are divided into six classes, namely Dandaka, Svastika, Maulika, Caturmukha, Sarvatobhadra and Vardhamana. Some of these, with a certain numbers of halls are stated to be temples, while others varying in number of rooms are meant for the residences of different casts. The maximum number of storeys a Shala has, is twelve as usual.

<u>Meaning and classification of Shala houses.</u>

There are ten classifications of the Shala buildings – from Ekashalas to Dasa Shalas, it takes up the fourth classification, namely the Catus Shalas both for its definition and classification. This may be because the Catus Shala houses are often mentioned in literature and this is the most characteristic type of ancient Indian buildings as the bulk of the middle class people used to live in this type of Shala house.

As regards the definition of these Shala – houses, Catus Shala, Trishala, Dvi Shala and Eka Shala are defined[6]. That is, a Catus Shala occupies the four sides of a quadrangle, which is an open space in the centre, the Angana, the Trishala the three sides, while Dvi Shala the two sides and Eka Shala only one side.

In the Catus Shala buildings, there were four rooms arranged on the four sides of a quadrangle which was the open space in the centre. Shala, as we have seen, is a long structure of one span only. The Trisshala and the Dvishala can be so adjusted as to accommodate an open space in their front along the road which can be laid out as a flower garden. Thus if all the houses on one or both sides of street recede in the middle as a Trishala or a Dvishala contemplates, we get gardens by the road side.

It has been pointed out that the Shala – buildings admit of ten broad classifications in the Samarangna-Sutradhara[7]. The ten broad divisions are:

Ekashala	-	Sat Shala
Dvishala	-	Sapta Shala
Trishala	-	Astashala
Catus Shala	-	Vavashala
Panca Shala	-	Dasashala

It has also been pointed out that among these only the first four are the principal types and the others are only different combinations of them. They are tabulated below to present at a glance their combinations.

Combinations

Pancashala -	1.	Dvishala and Trishala
	2.	Catusshala and Ekashala
Satshala -	1.	Dvishala
	2.	Trishala and Trishala
	3.	Dvishala and Catusshala
Saptashala -	1.	Two Trishalas and one Ekashala
	2.	One Ekashala, one Dvishala and one Catusshala.
	3.	Trishala and Catusshala
Astashala -	1.	Inner Catusshala and outer Catusshala
	2.	Two Trishalas and one Dvishala one Ekashala
Navashala -	1.	Two Identical Catusshalas and one Ekashala
	2.	Two dissimilar catusshalas and one Ekashala
	3.	Trishala, Trishala and Trishala
Dasshala -	1.	Two Identical Catusshalas and one Dvishala
	2.	Three Identical Trishalas and one Ekashala
	3.	Two Identical Trishalas and one Catusshala.

CONCLUSION

Indian architecture is suitable only to religious buildings. This may be true to the building cannos as developed in the ancient Indian Manuals, but the Shala houses are really the harbinger of the popular architecture.

Proofs of Vastu Sastra can be found during the time of Ramayana and Mahabharata. In the cities of Mohanjadaro and Harappa the application of Vastu Sastra can be seen. In the Matsya Purana, Seventeen preceptors of Vastu have been mentioned.

These principles called Vastu Sastra, were evolved over thousands of years out of experience and foresight of ancient sages of India and are very valuable for the well being of man kind. According to Sastras, if we worship, revere and respect the lords of these eight directions, they will shower on us their blessings and benefits. Our saints have searched Vastu Sastra, we are only researching it.

Because of Vastu Sastra, the whole universe gets good health, happiness and all round prosperity. Human beings attain divinity with their knowledge. Followers of Vastu Sastra get not only wordly pleasure but also experience heavenly bliss. With the ab ove sloka, it is very much clear that Vastu Sastra is Universal. It is not confined to any particular group of people in the development of all human being irrespective of any caste creed or religion.

References

1. Markandeya(Ch. 49) and Vayu Purana (Ch. 8)
2. Matsya Purana VII, 83-120
3. Ashvalayana (II.8)
4. T.P.Bhattacharya Canons of Architecture, P.4.
5. Manasara, Ch. Stambha (XV),
6. 18th Ch. Nagaradisanjna (Verses 18-19).
7. Samarangana Sutradhara Ch.19,21,22,23,25

------------- ൽ♦ൽ -------------

अधिगमः भारतीयदर्शनञ्च

– डॉ. नारायणवैद्यः

------------------------------------- ൽ♦ൽ -------------------------------------

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते इति गीतोक्तिमनुसृत्य प्रवर्तन्ते भारतीयदर्शनानि। अत्र ज्ञानं पारमार्थिकं, व्यावहारिकम्, उभयात्मकमिति च अङ्गीक्रियते। इदञ्च ज्ञानं धर्माधर्मविवेचनाय उपकृत्य मानवः इतरजन्तुभ्यः भिन्नः इति पृथक्कृत्य दर्शयति। भारतीयदर्शने ज्ञानं प्रकाशः, चक्षुः, आत्मा इत्यादिभिः शब्दैः वर्ण्यते। इदं च ज्ञानं विविधप्रमाणैः साक्षात्क्रियते। प्रमाणानि दर्शनानुसारं भिद्यन्ते। तत्र ज्ञानावाप्तये न्यायदर्शने चत्वारि प्रमाणानि उररीकृतानि विद्यन्ते। तानि प्रत्यक्षम् (Perception), अनुमानम् (Hypothesis), उपमानम् (Analogy), शब्दः (Word) चेति विभक्तानि।

भारतीयदर्शनस्यावगमनेन विशिष्य तत्रत्यप्रमाणानां सरणीं अवलोकयामश्चेत् पाश्चात्याधिगमसिद्धान्तेषु स्वीकारार्हः नूतनाविष्कारः भवितुं शक्यमिति ज्ञायते। यतो हि अस्मिन् विषये बहुभिः शोधकार्यं निर्वर्तितं दृश्यते। तदत्र किञ्चिदवलोकयामः –

1968 तमे वर्षे Guha महोदयेन The ploytheism of the Vedas gave place to monotheism or pantheism and the vedic Brahman condensed to one entry of the whole world the upanishadic Brahman i.e. atman (soul), moksh (salvation), sansara (metempsychosis), and karma (deeds) are the three basic concepts on which entire hindu philosphy was spun इत्युक्तम्।

एवं कर्मणा संसारः, संसारेण मोक्षः, मोक्षश्च ब्रह्मसाक्षात्कारमार्गः इति वक्तुं शक्यते। स च साक्षात्कारः सायुज्य, सामीप्य, सालोक्यादिरूपेण

तत्तद्दर्शनमाश्रित्य भिन्नश्चेदपि सामान्यतः ब्रह्मसाक्षात्कारमार्गम् अनुसरति। एतदर्थं जीवः प्रतिक्षणं जन्मप्रभृति आमरणं प्रयतते। प्रयासेऽस्मिन् जीवः किञ्चिदधिगच्छति। अस्मिन् परिप्रेक्ष्ये शास्त्राणि ज्ञानसाधनप्रमाणमधिकृत्य चर्चयति। तत्र प्रामुख्येन न्याय–वैशेषिक–सांख्य–योग–मीमांसा–वेदान्तेति षट्सु आस्तिकदर्शनेषु प्रमाणविचारः चर्चितोऽस्ति। तेषु परस्परं प्रमाणविचारे सहमतिः असहमतिश्च विद्यते।

Maxmuller महोदयः दर्शनानां विषये एवं प्रास्तौत् – Nyaya is logic and it's object knowledge of the nature of the sixteen padarthas by means of name, definition and examination. The objective of vaisheshika philosophy is to establish by the similarities and dissimilarities. The mimansa is two fold via karma mimansa (work philospphy) and the shariraka mimansa (philosophy of the embodied spirit). The first has been brought out with the aim to make clear the importance of work and the later aims at making clear the oneness of Brahman. The samkhya philosophy's objective is to teach difference between the prakriti & purusha there by attainment of moksha. The chief objective of yoga philospphy is to achieve concentration by means of stopping all wandering thoughts there by attainment of moksha इति।

न्यायदर्शनदृष्ट्या अधिगमः

न्यायशास्त्रे तावत् प्राधान्येन प्रमाणविचारः विचारितोऽस्ति। अत एव तर्कशास्त्रं प्रमाणशास्त्रमिति ख्यातिमाप्नोत्। न्यायशास्त्रमिति अस्यैव नामान्तरं विद्यते। न्यायो नाम अवयवसमूहः। अवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनि–गमनरूपाः। शास्त्रेऽस्मिन् ईश्वरप्रणीतत्त्वात् शब्दराशिः वेदः इति अभ्युपगम्यते। ईश्वरस्य रागद्वेषादीनां दोषाणाम् अभावात् वेदः यथार्थ इति मन्यते।

इह जीवः सुखं मे भूयात् दुःखं मनागपि मा भूत् इति विचिन्त्य सुखप्राप्त्यै दुःखनिवृत्यै च निरन्तरं प्रयतते। क्रमेऽस्मिन् अज्ञानापनोदनाय सततं शिक्षते। अयं न्यायशास्त्रे विचारितः प्राकृतिकाधिगमः पाश्चात्याधिगमसिद्धान्तवादिनां चित्ताकर्षकोऽस्ति। एवं यथार्थज्ञानार्जनाय अस्मिन् शास्त्रे प्रत्यक्षम्, अनुमानम्, उपमानं शब्दश्चेति चत्वारि ज्ञानसाधनानि प्रमाणानि स्वीकृतानि। एतस्य ज्ञानस्य अधिगमप्रक्रिया अधः प्रस्तूयते –

वैशेषिकदर्शनदृष्ट्या अधिगमः

विशेषपदार्थमङ्गीकुर्वन्तीति वैशेषिकाः इति विख्याताः। ते तावत् प्रत्यक्षम् अनुमानञ्चेति प्रमाणद्वयं स्वीकुर्वन्ति। उपमानं शब्दश्च अनुमाने एव अन्तर्भवतीति तेषामाशयः। तेषां मतानुसारं पृथ्वी, अप्, तेजः, वायुः इत्येवं चत्वारः अणवः नित्यानित्यभेदेन विभक्ताः सन्ति। एतेषां सम्मिश्रणेन जातं सर्वमनित्यं भवति। अत्र सूक्ष्माणवः स्वतन्त्राः पुनर्विभागमर्हन्ति। एते अणुपरिमाणवः सततं परिवर्तनमङ्गीकुर्वन्ति। अतः इमे पीलुपाकवादिनः इति परिचिताः अभवन्। वैशेषिकाणां मतानुसारं अधिगमप्रक्रिया न्यायशास्त्रानुगुणमेव प्रवर्तते। किन्तु न्यायशास्त्रे अधिगमाय प्रमाणचतुष्टयमपेक्ष्यते। वैशेषिकदर्शने प्रत्यक्षानुमानेन अधिगमः जायते इति वैशेषिकदर्शनस्य अस्त्यत्र किञ्चिद्वैशिष्ट्यम्।

सांख्यदर्शनदृष्ट्या अधिगमः

भारतीयदर्शनेषु "सांख्यं" स्वीक्रियते प्राचीनं महत्त्वपूर्णञ्च। अस्य दर्शनस्य प्रवर्तकः महर्षिः कपिलमुनिः अस्ति। संख्यायन्ते गण्यन्ते पदार्था अस्मिन्निति सांख्यम् इति व्युत्पत्त्या प्रथमतः पदार्थानां गणना अस्मिन् एव दर्शने अभवत् संख्यायाः प्राधान्येन अस्य दर्शनस्य सांख्यं नाम सर्वथा सार्थख्यं भजते। विवेकज्ञानम् इति अस्य दर्शनस्य अपरं नाम विद्यते। प्रकृतिपुरुषयोरज्ञाने

संसारभावज्ञाने च मोक्ष इति प्रकृतिपुरुषयोर्विवेकज्ञानस्य प्रामुख्येन दर्शनमिदं सांख्यं निगद्यते।

सांख्यदर्शने पञ्चविंशतिः तत्त्वानि परिगणितानि। तेषु चतुर्विंशतिः तत्त्वानि प्राकृतानि सन्ति। एकञ्च पुरुषतत्त्वं वर्तते। एषामेव पञ्चविंशतितत्त्वानां गणना अभूत् सांख्यदर्शने। कार्यकारणविषयोऽस्ति सांख्यस्यैकं विशिष्टं मतं यत् सत्कार्यवादशब्देन प्रसिद्धम्। सांख्यदर्शनं कारणव्यापारात् प्रागपि कार्यं सदिति स्वीकरोति। न्यायवैशेषिकमतं कारणव्यापारात् पूर्वं कार्यमसदिति मनुते। सांख्यस्याभिमतः परिणामवादः न तु विवर्तवादः। एषः वादः अधिगमसिद्धान्तस्य कृते उपकारकः वर्तते। यद्येतस्य सांख्यसिद्धान्तस्य अधिगमदृष्ट्या पर्यालोचयामः चेत् व्यक्तिः बाह्यकारकैः प्रभावितः न भवति। जन्मतः सूक्ष्मरूपेण अधिगमसामर्थ्यं निगूहितं वर्तते इति सिद्धान्तयितुं शक्यते।

योगदर्शनदृष्ट्या अधिगमः

अस्ति योगशास्त्रं प्राचीनतमं ज्ञानम्। यस्मिन् न विद्यते कोऽपि विवादः। योगः एवास्ति सर्वोत्तमः मोक्षोपायः संसारसागरनिमग्नस्य जीवस्येश्वरसंयोगे भक्तिज्ञानयोश्च प्रधानं साधनम्। यद्यपि समुपलब्धयोगसूत्राणां प्रणेता पतञ्जलिः, किन्तु तस्मादपि योगः अर्वाचीना आध्यात्मप्रक्रिया वर्तते। संहितासु, ब्राह्मणेषु, उपनिषत्सु च अनेकत्र योगस्य सङ्केतः उपलभ्यते। योगः सांख्याभिमतं सर्वं तत्त्वं स्वीकृत्य ईश्वरं तदतिरिक्तं षड्विंशतितमं तत्त्वं मनुते। अत एव योग सेश्वरसांख्येत्यप्युच्यते।

अत्र जीवात्मनः परमात्मनः योगः प्रतिपाद्यते। व्यक्तिः सामान्यतया पञ्चसम्बन्धैः अभियुक्तः भवति। एतेभ्यः वियोगः जायते चेत् तदानीं सः मुक्तः इति ज्ञायते। योगस्याधिगमप्रेक्ष्ये इत्थं प्ररूपणं दृश्यते – The process of yoga on of the two ways for kaivalya, is a hierarchy of behavior

modifications ranging from an individual sphere to the spiritual sphere through the social and ethical spheres इति।

Reya महोदयः योगविषये एवं कथयति – Yoga instead of renouncing the material nature of man, accepts the body as an instrument of the realization of spiritual life. The mind amplifying practices, including the moral and physical and spiritual preparations are prescribed in all works of yoga's इति। एतच्च अधिगमसिद्धान्तदृष्ट्या महत्त्वं भजते।

मीमांसादर्शनदृष्ट्या अधिगमः

कस्यापि वस्तुरूपस्य यथार्थवर्णनं मीमांसाशास्त्रस्य प्रमुख विषयः। कर्मकाण्डं ज्ञानकाण्डं चेति वेदस्यास्ति मुख्यं भागद्वयम्। यज्ञादिविधिवर्णनं कर्मकाण्डस्य विषयः, जीवजगदीश्वरूपाणां तेषां च सम्बन्धनिरूपणं ज्ञानकाण्डस्य विषयः। मीमांसाऽपि द्विविधा कर्ममीमांसा ज्ञानमीमांसा इति। कर्ममीमांसा इति नाम्ना अभिहितं दर्शनमेव मीमांसा इति कथ्यते। ज्ञानमीमांसानाम्ना विख्यातम् वेदान्तः इति अभिधीयते। मीमांसादर्शनं वैदिकं विद्यते। मीमांसते इति क्रियापदस्य, मीमांसा इति संज्ञापदस्य च प्रयोगः ब्राह्णग्रन्थेषु, उपनिषत्सु च लभ्यते। तस्मात् मीमांसा दर्शनम् अति प्राचीनकालसम्बद्धमिति प्रतीयते।

अस्मिन् दर्शने पञ्चप्रमाणानि अभ्युपगतानि। तानि प्रत्यक्षानुमानोपमान–शब्दार्थापत्त्यादीनि प्रसिद्धानि। दर्शनास्यास्य अधिगमपरिप्रेक्ष्ये महत्त्वं वर्तते। अत्र लोकस्य परमाप्तेन ईश्वरेण उक्तत्वात् प्रामाण्यं विद्यते वेदस्य। ज्ञानार्जनक्रियायां वैदिकवाक्यस्य विधि–मन्त्र–नामधेय–निषेध–अर्थवादभेदेन पञ्चधा विभज्य विचारः क्रियते। आप्तवाक्यस्य वेदस्य प्रामाण्यम् उररीकृत्य प्रमेयः परिशील्यते। लोके सामान्यव्यवहारेष्वपि अधिगमाय आप्तवाक्यं प्राथम्यं

भजते। यथा – लघुबालेन मम पिता कः इति पृष्टे माता एषः तव पिता अस्ति इति दर्शयति। अत्र पितुः अङ्गीकारे मातुः आप्तवचनं प्रामाण्यतया लघुबालः स्वीकरोति। अतः अधिगमाय आप्तवाक्यस्य महत्त्वं अस्ति। एवं अधिगमदृष्ट्या मीमांसाशास्त्रं प्रामुख्यं भजते।

वेदान्तदर्शनदृष्ट्या अधिगमः

वेदान्तदर्शने उपनिषदः विचाराणां विस्तृतं विवरणं उपलभ्यते। वेदान्तशास्त्रस्य प्रतिपाद्यः विषयः आत्मनिरूपणं वर्तते। आत्मनः एकत्वप्रतिपादनाय इदं शास्त्रं प्रवर्तते। जीवः संसारे निमग्नः सन् विभिन्नज्ञानसाधनैः प्रमाणैः परमं ज्ञानं प्राप्नोति। अस्मिन् प्रक्रियायां जीवः कथं जानातीति व्यावहारिकी अधिगमप्रक्रिया प्रमाणपुरस्सरं निरूप्यते। अत्र व्यावहारिकदृष्ट्या अधिगमस्य प्रभावोत्पादकेषु तत्त्वेषु परिस्थितिः, आवरणं, माया, संसारः इत्येतत् प्रामुख्येन प्रतिपाद्यते। एतच्च अधिगमसिद्धान्तदृष्ट्या मुख्यं स्थानम् अलङ्करोति। जीवस्याधिगमः सानुकूलप्रतिकूलतत्त्वैः प्रभावितः भवतीति शास्त्रेऽस्मिन् कथ्यते। इन्द्रियदोषादिवशात् प्रत्यक्षमपि क्वचित् भ्रमां जनयतीति वेदान्तदर्शनस्य सिद्धान्तः अधिगमनविज्ञानाय नितरामुपकारकः।

एवं दार्शनिकाधिगमप्रक्रिया प्रत्येकं मानवं संशोध्य मोक्षोपायमुपदिश्य च अद्यापि संसारमग्रे प्रवर्तयन्ती अस्तीति अलं पल्लवेन।

संदर्भग्रन्थसूची

क्र.	पुस्तकस्य परिचयः	लेखकः	संवत्सरः
01.	न्यायदर्शन, चौखम्बा विद्याभवन, वाराणसि – 1	गौतमः	1970
02.	न्यायसिद्धान्तमुक्तावली, चौखम्बा विद्याभवन, वाराणसि – 1	विश्वनाथन्यायपञ्चानन	1972

क्र.	पुस्तकस्य परिचयः	लेखकः	संवत्सरः
03.	तर्कसङ्ग्रहः, व्यासप्रकाशन, डि 16/13 मानमन्दिर, वाराणसि	अन्नम्भट्टः	–
04.	ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर.	–	–
05.	शिक्षा मनोविज्ञान, आर लाल बुक डिपो, निकट गवर्नमेंट इन्टर कॉलेज, मेरठ 250001	पाण्डेय	2001
06.	शिक्षा मनोविज्ञान,PHI learning private limited, New Delhi 110001	एस्.के.मंगल	2011
07.	शिक्षा तकनीकी PHI learning private limited, New Delhi 110001	एस्.के.मंगल	2011
08.	Nyaya Philosophy, Standard Publishers New Delhi	Dr. Arvind Kumar	2005
09.	Concept of sentence analysis in nyaya Philosophy,Naga Publishers, 11A (UP) Jawahar Nagar, Delhi - 110007.	Jha Punita Sharma	1998
10.	भारतीय दर्शनगळु (कन्नड)नवकर्नाटक पब्लिकेशन्स, प्रैवेट् लिमिटेड एंबेसिसेंटर, क्रेसेण्ट् मार्ग, बेंगळूरु – 560001.	डॉ.देवीप्रसाद चट्टोपाध्याय	1996

व्याकरणशास्त्रे लोकजीवनम्

– डॉ. शिवरामभट्टः

व्याकरणम्– व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययतदर्थनिर्देशपुरस्सरं व्याख्यायन्ते शब्दा अनेनेति व्युत्पत्त्या व्याकरणशब्दो निष्पाद्यत इति सर्वविदित एव।

अर्थविशिष्टशब्दनिष्ठपुण्यजनकतावच्छेदकसाधुत्वजातिविशेषव्यञ्जकस्यास्य व्याकरणस्य मुखं व्याकरणं स्मृतम्, ''प्रधानं च षट्त्सु अङ्गेषु व्याकरणम्''[1], ''प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः''[2], इत्यादिभिः वचोभिः सर्वविद्याना–मधिविद्यत्वं प्रकाश्यते। ''तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्''[3], ''तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते''[4], ''इयं सा मोक्षमार्णानामजिह्मा राजपद्धतिः''[5], ''साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः''[6], ''रक्षोहागमलघ्वसंदेहाः प्रयोजनम्''[7], यस्तु प्रयुङ्क्त इत्यादिभिः उक्तिभिः व्याकरणस्य महन्माहात्म्यं प्रत्यपादि।

लोकः – लोक्यतेऽसावित्यर्थे लोकृ दर्शने लोकृ भाषायामित्यस्माद्वा धातोर्घञि लोकशब्दो निष्पाद्यते। लोकस्तु भुवने जने इति अमरकोशानुसारमर्थद्वयेऽपि प्रयुज्यते लोकशब्दः। जनजीवनं सामाजिकजीवनं वा लोकजीवनशब्देन व्यपदेष्टुं शक्यते व्यापकार्थे इति प्रतिभाति। प्रयुक्तानामिदमन्वख्यानम्, यच्छब्द आह तदस्माकं प्रमाणम् इत्यादिवाक्यैः व्याकरणस्य लोकाश्रयत्वमवगम्यते। अपदं न प्रयुञ्जीत, न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः, एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति इत्यादिभिः वचोभिः शाब्दिकव्यवहारसन्दर्भे जनजीवनस्य भाषाभिव्यक्तिनियमनाय नैपुण्याधिगमाय

प्रयोगवैशिष्ट्यसम्पादनाय च व्याकरणमावश्यकमिति लोकजीवनस्य व्याकरणाश्रयत्वं युज्यते। इत्थं च व्याकरणशास्त्रं लोकजीवनं च एकस्यैव नाणकस्य पार्श्वद्वयमिव भवतः इति वक्तुं शक्यते। सम्प्रति व्याकरणशास्त्रे लोकजीवनयात्रा कथं प्रावर्ततानवच्छिन्नतयेति अवलोकयामः।

व्याकरणे लोकजीवनम– शाब्दिकव्यवहारसन्दर्भे लौकिकानां वैदिकानां च शब्दानामपभ्रंशादिदोषराहित्येन कथं प्रयोगः कर्तव्यः? तेन लोके कथं वर्तितव्यम्? तद्द्वारा मोक्षप्राप्तिः कथं शक्येति प्रतिपादनम्, मार्गदर्शनमेव व्याकरणस्य मुख्यं कार्यं योगदानं च वरिवर्ति लोकजीवने। महाभाष्ये तावदसंख्याकानि उदाहरणानि लभ्यन्ते लोकजीवनस्य। यथा– व्याकरणाध्ययनस्य प्रयोजनकथनावसरे यस्तु प्रयुङ्क्ते इत्यत्र क्व पुनरिदं पठितम्? भ्राजा नाम श्लोकाः। किं च भोः श्लोका अपि प्रमाणम्?। यदि प्रमाणम् अयमपि प्रमाणं भवितुमर्हति।

''यदुदुम्बरवर्णानां घटीनां मण्डलं महत्।
पीतं न गमयेत्स्वर्गं किं तत्क्रतुगतं नयेत्।।''[8] इति

सौत्रामणियागे सुरापानस्य दुष्टत्वमुदभावि। लोके क्रियमाणं कर्मेदं प्रत्यपादि। एवमेव दशम्यां पुत्रस्येत्यत्र जातस्य पुत्रस्य कीदृशं नाम विदध्यात् इति विषयमुपस्थाप्य दशम्युत्तरकालं पुत्रस्य जातस्य घोषवदाद्यन्तरस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं च नाम विदध्यात्। तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति नामकरणसंस्कारसन्दर्भे पितृभ्यां निर्देशः प्रादायि। एवं शब्दानुशासनोपदेशोपक्रमे भक्ष्याभक्ष्यनियमः प्रत्यपाद्यत भगवता पतञ्जलिना। शब्दापशब्दयोरन्यतरोपदेशेन कृतं स्यात्। तद्यथा – भक्ष्यनियमेन अभक्ष्यप्रतिषेधो गम्यते। पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यत एतत् अतोऽन्येऽभक्ष्या इति। अभक्ष्यप्रतिषेधेन च गम्यते भक्ष्यनियमः। तद्यथा– अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यत एतत् आरण्यो भक्ष्य इति।

एवमेव सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः इति वार्तिकनिरूपणावसरे पयोव्रतो ब्राह्मणः, यवागूव्रतो राजन्यः, आमिक्षाव्रतो वैश्यः इति खाद्यनियमव्रतं प्रत्यपादि।

एवमेव पस्पशाह्निके भाष्ये शब्दज्ञानस्य धर्मजनकताधिकरणे 'अथवा कूपखानकवदेतद्भविष्यति। तद्यथा कूपखानकः कूपं खनन् यद्यपि मृदा पांसुभिश्च अवकीर्णो भवति। सोऽप्सु संजातासु तत एव तं गुणमासादयति। येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति इति। अइउण्सूत्रे भाष्ये विषयेण तु नानालिङ्गकरणात्सिद्धमिति वार्तिकव्याख्यानावसरे, नैष दोषः। लोकत एतत्सिद्धम्। तद्यथा – लोके कश्चिदेवं देवदत्तमाह– इह मुण्डो भव, इह जटिलो भव, इह शिखी भव इति यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपतिष्ठत इति एकस्यैव पुरुषस्य नानारूपत्वं प्रतिपादितम्।

तथा च ऋलृक्सूत्रे भाष्ये अनुकरणं हि शिष्टस्य साधु भवति अशिष्टाप्रतिषिद्धस्य नैव तद्दोषाय भवति नाभ्युदयाय। यथा लौकिकवैदिकेषु। लोके तावत् य एवमसौ ददाति य एवमसौ यजते य एवमसौ अधीते तस्यानुकुर्वन् दद्यात् यजेत अधीयीत वा सोऽभ्युदयेन युज्यते। अशिष्टाप्रतिषिद्धं तु य एवमसौ हिक्कति हसति कण्डूयति वा। तस्यानुकुर्वन् हिक्केत् हसेत् कण्डूयेत्। नैव तद्दोषाय स्यान्नाभ्युदयाय। यस्तु खलु एवमसौ ब्राह्मणं हन्ति सुरां वा पिबति। तस्यानुकुर्वन् ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात्। परन्तु ब्राह्मणहननं सुरापानं चानुकुर्वन् स्नातानुलिप्तः माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात् पयो वा पिबेत्। न स मन्ये पतितः स्यादिति। अनुकरणशीलेऽस्मिन् जगति कीदृशमनुकरणं शिष्टमप्रतिषिद्धं चेति न्यरूपि।

तत्रैव स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थः सन् प्रत्याख्यायते। सैषा महतो वंशस्तम्भात् लट्वानुकृष्यते इति भाष्यपङ्क्त्या ज्ञायते यत् अत्यल्पस्य

प्रयोजनस्य कृते सुदीर्घः प्रयासः महतो वंशस्तम्भात् लट्वानुकर्षणमिव भवतीति अयुक्तत्वं न्यगादि।

तथैव एओङ्सूत्रे वर्णैकदेशग्रहणनिर्णयाधिकरणे नाव्यपवृक्तस्यावयवस्य तद्विधिर्यथा द्रव्येषु इति वार्तिके तैलं न विक्रेतव्यं घृतं न विक्रेतव्यमिति व्यपवृक्तं न विक्रीयते। अव्यपवृक्तं गावः सर्षपाश्च विक्रीयन्ते। तथा लोमनखं स्पृष्ट्वा शौचं कर्तव्यमित्युक्ते व्यपवृक्तं स्पृष्ट्वा नियोगतः शौचं कर्तव्यम् अव्यपवृक्ते कामचारः इत्यनेन लोकजीवनं न्यरूपि।

एवमेव हयवरट्सूत्रे रेफस्य पूर्वापरोपदेशचर्चासन्दर्भे नेमौ रहौ कार्यिणौ द्विर्वचनस्य। किं तर्हि? निमित्तमिमौ रहौ द्विर्वचनस्य। तद्यथा– ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम् इति नेदानीं तौ भुञ्जाते इत्यनेन ज्ञायते यत् लोकजीवने कर्त्रोः भोजनपरिवेषणे सामकालिके न भवत इति निरदेशि।

समर्थः पदविधिः इति सूत्रे भाष्ये भाष्यकृता लोकव्यवहारनिदर्शकं समीचीनमुदाहरणमेकं प्रादायि। तद्यथा– एवं हि दृश्यते लोके भिक्षुकोऽयं द्वितीयां भिक्षां समासाद्य पूर्वां न जहाति संचयायैव प्रवर्तते इति भिक्षुको धनसंग्रहे लुब्धः कथं वा पूर्वां भिक्षां जह्यात्। अनेनोदाहरणप्रदर्शनेन ज्ञायते यत् लोके भिक्षुकस्य ऐश्वर्यवतो वा ततोऽप्यधिकसंचयने एव मनः प्रवर्तते इति भावः। तथैव अनुदात्तङित आत्मनेपदमिति सूत्रे न खलु अन्यत्प्रकृतमनुवर्तनादन्यद् भवति यथा गोधा सर्पन्ती सर्पणाद् अहिर्भवति इति स्वातन्त्र्यमात्रप्राप्तिलाभेन न केऽपि चोराः दुष्टाः शठा वा नागरिकपदवीमर्हन्ति न वा ते शुद्धाचाराः सम्भवन्तीति प्रतिपादितम्।

इग्यणः सम्प्रसारणमिति सूत्रे भाष्ये लौकिकदृष्टान्तेन सूक्ष्मं चिन्तनं प्रादर्शि। यथा – कश्चित् कञ्चित् तन्तुवायमाह – अस्य सूत्रस्य शाटकं वय इति। स पश्यति यदि शाटको न वातव्यः। अथ वातव्यो न शाटकः। एवं शाटाको वातव्यश्चेति विप्रतिषिद्धम्। भाविनी खल्वस्य संज्ञा अभिप्रेता। स मन्ये वातव्यः – यस्मिन्नुते

शाटक इत्येतद् भवति इति। एवमेव घटं कुरु, कौमुदीयं विरच्यते इत्यादीन् लौकिकव्यवहारानपि भाविनं बुद्धिस्थं पदार्थं मनसि निधाय कुर्मः। एवमेव मार्गनगरकृषिवैद्यकप्रबन्धरोगप्रतिबन्धधान्यसंचयगवाद्युपचारादयो नैके विषया लोकजीवनसंबद्धा महाभाष्ये दरीदृश्यन्ते।

तथा च परिभाषेन्दुशेखरे यथोद्देशकार्यकालपरिभाषाव्याख्यावसरे महामहोपाध्यायस्य नागेशभट्टस्य 'अत्रैकदेशस्थ इत्यनेन तत्र तत्र तद्बुद्धावपि तत्तद्देशस्थत्वं वारयति। यथा व्यवहर्तृणां कार्यार्थमनेकदेशगमनेऽपि न तद्देशीयत्वव्यवहारः। किन्तु अभिजनदेशीयत्वव्यवहार एव' इति कथनेन वयमुद्योगार्थं कार्यार्थं वा अन्यदेशं गच्छामश्चेदपि अस्मदभिजनदेशेनैव परिचीयामहे वयमिति ज्ञायते। एवमेव सकृद्गतिपरिभाषायाः सिद्धयवसरे प्रतिपादितं यत् एकस्मिन् लक्ष्ये युगपदुभयोः कार्ययोः प्रवृत्तयोः बाधकाभावात् पर्यायेण प्रवृत्तौ विप्रतिषेधसूत्रं नियमार्थं सकृद्गतिन्यायसिद्धिर्भवतीत्युक्त्वा यथा तुल्यबलयोरेकः प्रेष्यो भवति। स तयोः पर्यायेण कार्यं करोति। यदा तमुभौ युगपत्प्रेषयतः नाना दिक्षु च कार्ये। तदा उभयोर्न करोति यौगपद्यासम्भवादित्युक्तम्।

एवमेव असिद्धं बहिरङ्गमन्तरङ्गे इत्यत्र अन्तःकार्यत्वरूपान्तरङ्ग–व्याख्यावसरे मनुष्योऽयं प्रातरुत्थाय शरीरकार्याणि करोति। ततः सुहृदां ततः सम्बन्धिनाम् इति कथनेन ज्ञायते दैनन्दिनलोकजीवने मनुष्यस्य प्राथमिकं कार्यम्।

एवमेव वाक्यपदीये अम्बाम्बेति यदा बालः शिक्षमाणः प्रभाषते। अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः।। उपायाः शिक्षमाणानां बालानामुपलालनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।। इत्यादिभिः कारिकाभिः लौकिकं जीवनमवगम्यते।

उपसंहारः –

इत्थं च व्याकरणं लोकाधीनमिति कृत्वा लोकानां प्रत्येकं जीवनक्षणे व्याकरणस्य उत व्याकरणस्य प्रत्येकं प्रतिपादनसंदर्भे लोकजीवनस्य प्रवृत्तिरस्त्येव इति उक्त्वा लेखनव्यापाराद्विरम्यते।

सन्दर्भसूची

1. व्याकरणमहाभाष्यम्– पस्पशाह्निकम्
2. वाक्यपदीयम्– (ब्रह्मकाण्डम्)श्लोकसंख्या–11
3. तत्रैव – 14
4. तत्रैव – 13
5. तत्रैव – 16
6. तत्रैव – 141
7. व्याकरणमहाभाष्यम्– पस्पशाह्निकम्
8. तत्रैव

सन्दर्भग्रन्थसूची

1. श्री भार्गवशास्त्री , **महाभाष्यम्** , चौखम्बा संस्कृत प्रतिष्ठान – दिल्ली
2. प्रो. चारुदेवशाास्त्री , **शब्दापशब्दविवेकः** , नाग पब्लिशर्स् – दिल्ली, 1982.
3. पं. नारायणदत्त त्रिपाठि, **लघुसिद्धान्तकौमुदी**, गीताप्रेस्, गोरखपुर 2004
4. पं युधिष्ठिर मीमांसकः, **संस्कृत व्याकरणशास्त्र का इतिहास**, रामलाल कपुर ट्रस्ट, बहालगढ – 1996
5. भट्टोजी दीक्षितः, **वैयाकरणसिद्धान्तकौमुदी**, चौखम्बा संस्कृत ग्रन्थमाला, वाराणसी,1996

6. पं. रामप्रसाद त्रिपाठी, **वाक्यपदीयम्**, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2001

7. कौण्डभट्टः ,**वैयाकरणभूषणसारः** , निर्णयसागरप्रेस , मुम्बई,1995

8. हिन्दीव्याख्याकारः डॉ. उमेशचन्द्र पाण्डेयः, **वैयाकरणसिद्धान्तकौमुदी**, चौखम्बा विद्याभवन, वाराणसी, सप्तमसंस्करणम्–2006

9. आचार्य विश्वनाथ मिश्र, **परिभाषेन्दुशेखरः**, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2001

Sri Madhvacharya on Bhagavad Gita
(Central Teaching of Bhagavad Gita by Sri Madhva)

Dr. Saroj Kumar Padhi

Sri Madhva has written two commentaries on the Bhagavad Gita : the Gita Bhashya and the Gita Tatparya. The Gita Bhashya of Madhva unlike the Bhashya of Shankar and Ramanuja is not elaborate. He comments on only such verses which are philosophically important and which were not correctly or adequately explained by his predecessors. He interprets these verses in the context of the topic of the chapter as well as the central teaching of Bhagavad Gita. While interpreting individual verses, he gives particular attention to its relevance to the total purport or (महातात्पर्य) of the truth. He fully utilizes the method of Upakrama (उपक्रम), Upasamhara (उपसंहार) etc. He quotes a vast mass of authorities and literature in support of his interpretation. His Gita tatparya is a companion volume to the Gita Bhashya, it supplements the interpretation of the Bhashya with additional arguments, authorities and discussions. In the introductory portion the central teaching of the Bhagavad Gita is enunciated and the relevance of all other topics discussed in the Bhagavad Gita to his central teaching is brought out. It will not be possible to make even a brief survey of the problem discussed in the two works in this small paper. Therefore , it is proposed to deal with only those aspect of Sri Madhva's interpretation of the Bhagavad Gita and which bring out the central teaching according to his Bhashya.

In this paper it is proposed to outline the central teaching of the Bhagavad Gita according to Madhva's interpretation.

Let me first state the central teaching in Sri Madhva's own word.

तत्र उत्तमाधिकारिणमात्मनः प्रियतममर्जनं क्षत्रियाणां, विशेषितोऽपि परमधर्म नारायणद्विट्तदनुबन्धिनिग्रहं बन्धुस्स्नेहादधर्मत्वेनाशङ्कय ततो निवृत्तप्रायं स्व विहितवृत्या भक्त्या भगवदाराधनमेव परमो धर्मः तद्विरुद्धः सर्वोऽप्यधर्मः भगवदधि ानत्वात् सर्वस्येति बोधयति भगवान्नारायणः ।

This statement of central teaching makes the following points clear.

1. Arjuna is उत्तमधिकारिन् (not मन्दाधिकारिन् as contended by Sankar)
2. The issue involved here is not a narrow issue of killing Kauravas or their supporters but those who were opposed to Dharma and God.
3. Arjuna is labouring under the impression that killing these people in Adharma.
4. He is confusing between Dharma and Adharma an account of his attachment to his kith and kin, and therefore propose to shirk his duty.
5. Performance of one's own duty in dedication to God with devotion is Dharma.
6. Shirking One's own duty or trying to perform a duty which is one's own duty without a sense of dedication and devotion is Adharma.
7. Everything is entirely dependent upon God.

8. Arjuna being a Kshatriya, it is especially his duty to oppose those who are in the path of Adharma.

Of these eight points let us first consider the fifth point which is the center of all other points viz स्वविहितवृत्या भक्त्या भगवदाराधनमेव परमो धर्मः. It should be noted that स्वविहितभक्ति and भगवदाराधन together constitute dharma not merely either स्वविहितवृत्ति or Bhakti न भक्त्यादिकं प्रत्येकं परमो धर्मः किन्तु मिलितमेव. Therefore Arjuna retract from his duty to fighting those who are opposed Dharma and God, and practices devotion to God he will not have discharged his Dharma. Similarly if he fight without realizing that he is भगवदधीन and without dedication then also he will not have discharged his Dharma. Therefore, a combination of these are instead upon in the Gita. This is made clear in the following passages.

1. स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः[1]
2. श्रेयान् स्वधर्मो विगुणः, परधर्मो भयावहः[2]
3. अथ चेत् त्वमिमं धर्म्यं संग्रामं न करिष्यति ।
   ततः स्वधर्म कीर्तिं च हित्वा पापमवाप्स्यसि ।।[3]

it is स्वविहितवृत्ति or स्वधर्म that must be performed, not merely धर्म or विहितवृत्ति what is विहितवृत्ति or धर्म are one may not be the same or another, it is this स्वविहितवृत्त्या भक्त्या भगवदाराधनम् that is Karmayoga according to Madhvacharya.

This Karmayoga has four aspects and therefore it termed as कर्मचतुरङ्ग by jayatirtha. These are 1. विहितकर्मानुष्ठानम् 2. श्रवणादिद्वारा परमात्मज्ञानम् 3. सन्यासः 4. त्यागः the first one viz.

विहितकर्मानुष्ठान has two part i.e. वर्णाश्रमधर्म and साधारणधर्म. The वर्णाश्रमधर्म are preserved in Dharmashastra. The साधारणधर्म such as dana, paropakara, maitri etc. are well known.

The second i.e. श्रवणादिद्वारा परमात्मज्ञानम् consists of the Knowledge of God as निदेश, निखिलगुणपूर्ण, सर्वतन्त्रस्वतन्त्र and सर्वोत्तम etc. and the knowledge that prakriti, jiva, etc. are entirely dependent upon God.

1. मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय । [4]

2. उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।[5]

3. अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।[6]

4. यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।[7]

5. न मे विदुः सुरगणाः प्रभवं न महर्षयः ।[8]

A large number of passages brings out the सर्वतमत्व, पूर्णत्व, निर्दोषत्व and other aspects of God.

1. अहं सर्वस्य प्रभवः मत्तः सर्वं प्रवर्तते ।[8]

2. मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।[9]

3. मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।[10] etc. point out the fact that प्रकृति and जीव are entirely dependent upon god.

1. मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।[11]

2. भूतभृन्न च भूतस्थो ममात्मा भूतभावनः[12] etc. and other sentences bring out स्वतन्त्रत्व aspects of God.

The third aspect of Karmachaturanga is Sannyasa. The Sannyasa of the Bhagavad Gita is neither yatyashrama in the formal sense nor Karmaparityaga. It is Samkalpa Sannyasa or renunciation of motives. This is brought out by the impression मा कर्मफलहेतुर्भूः[13], Do not make fruits of your actions your motives for doing them. (let not the fruits of actions be the motives). This explanation hints more correctly than the other two explanations i.e. कर्मफलस्य हेतुः मा. भूः and कर्मफलयोः हेतुः मा भूः given by other Bhashyakaras.

The fourth aspect is त्याग which mans सर्वकर्मफलज्ञस्य भगवति समर्पणम्, this is stated in the verse सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः[14] of these four aspects of Karmayoga. The first two i.e. विहितकर्मानुष्ठानम् and श्रवणादिद्वारा परमात्मज्ञानम् are actual activities while the last two सन्यास and त्याग relate to the perspective to the adopted informing Karma with the perspective of Karma yoga is no longer प्रवृतिमार्ग, only the actions with motives constitute pravruti marga. When the motive is eliminated, it is Nivriti Marga.

निष्कामं ज्ञानपूर्वं तु निवृत्तमिह चोच्यते । Thus Madhva invests a new meaning into the concepts of the Nivriti marga. Nivriti Marga is not total abandonment of activity but abandonment of motives. This is made clear in the Bhagavad Gita in the Verse.

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ।।[15]

In the view of above, the question raised in

ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत् किं कर्मणि घोरे मां नियोजयसि केशव ।।

is not a choice between Karma and Jnana much less a preference for Jnana repudiating karma but it is a question of choice between fighting and other activities which involve killing and which motives such as winning the kingdom cannot be easily eliminated and yatyashrama where in there is nothing of motives, Jayatirtha puts the problem raised by Arjun in this verse as follows.

रागादिप्रसक्तिहीनेषु अनुष्ठानेषु यतिधर्मेषु सत्सु अशक्यानुष्ठाने युद्धे नियोजनमयुक्तम्

The answer given is, 'you being a kshatriya yatyashrama is not svadharma for you'. Shankar and a selected few others are eligible for Jnanayoga, while even Janaka followed the path of Karmayoga. Even Jnanayoga is not completely divorced of Karma, nor Karmayoga completely divorced of Jnana. The impression are explained as ज्ञानप्रचुरो योगो ज्ञानयोगः and कर्मप्रचुरो योगः कर्मयोगः.

Sri Madhva has enlarged the scope of Karmayoga so as to include sharvana, manana etc. the first of Jnana into it and also has included correct prospective as a part of Karmayoga. He does not accept the contention that karma is opposed to jnana nor does he subscribe to Jnanakarmasamuchaya vada. Neither in the stanza यस्त्वात्मनि एव स्यात् nor in the stanza ज्ञानयोगेन सांख्यानां total abandonment of Karma is intended. The former relates to released soul while the latter refers to merely बाह्यकर्मसंकोचः. Performance of Karma both before and after release is helpful. Before release it assists Antahkarana-shuddhi and Jnana, after release आनन्दोत्कर्ष. The nature of Karma to be performed at different stages may differ but Karma as such is to be dispensed with at any stage.

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्[16]

IV

Sri Madhava assigns a unique place of bhakti in the scheme of sadhanas. He mentions various stages of Bhakti as पक्वभक्ति, परिपक्वभक्ति and अतिपरिपक्वभक्ति.

The role of these stage of Bhakti is explained in the Gitatatparya as follows.

भक्त्या प्रसन्नो भगवान् दद्याद् ज्ञानमनाकुलम् ।
भक्तिं च भूयसीं ताभ्यां प्रसन्नो दर्शनं ब्रजेत् ।।
ततोऽपि भूयसी भक्तिं दद्यात्ताभ्यां विमोचनम् ।।

This scheme is further explained by Jyatirtha as follows.

1. अतिपरिपक्वभक्तियोग एव मोक्षसाधनं न भगवद्दृष्टिः ।
   सा तु तत्साधनत्वात् मोक्षसाधनमुच्यते ।
2. परिपक्वभक्तियोग एव दृष्टिसाधनं न तु ध्यानम् ।
   तत्तु तत्साधनमिति दृष्टिसाधनतया उच्यते ।।
3. पक्वो भक्तियोग एव ज्ञानसाधनं न तु श्रवणादि ।
   तत्तु तत्साधनतया ज्ञानसाधनमुच्यते ।।

Thus Parokshjnana, Dhyana and Aparokshjnan lead to greater and greater intensity of Bhakti which ultimately lead to liberation. Even after liberation, Bhakti is Sadhan-Bhakti, while after liberation it is sadhyarupa. This is made clear in the following.

मुक्तोऽपि तद्वशो नित्यं भूयो भक्तिसमन्वितः ।
साध्यानन्दस्वरूपैव भक्तिर्नैवात्र साधनम् ।।

According to Sri Madhva Karma, Jnana And Bhakti are to continue even after liberation, Bhakti is defined by him -

माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्तिरिति प्रोक्तः this is beautifully elaborated by Jayatirtha as परमेश्वरभक्तिर्नाम निरवधिकानन्तानद्यकल्याणत्वज्ञानपूर्वकः स्वात्मात्मीयसमस्त वस्तुभ्योऽनन्तगुणाधिकः अनतरायसहस्रेणाप्यप्रतिवद्धः निरन्तरप्रेमप्रवाहः।

what is important in liaising the mahatmya of God is to realize that all other things are entirely dependent upon him, he is free from defects and possesses all qualities.

सर्वस्य तदधीनत्वं सर्वसद्गुणपूर्णताम्।
निर्दोषत्वं च विज्ञाय विष्णोस्तत्राखिलाधिकः।।
स्नेहो भक्तिरिति प्रोक्तःसर्वोपायोत्तमोतमः।

The elaboration of the central teaching of Bhagavad Gita as स्वविहितवृत्त्या भक्त्या भगवदाराधनमेव परमो धर्मः। makes it clear that the discussion of all other topics such as bhakti, Jnana, Sarvatamatva of God and the dependence of Prakriti, Jiva etc. on God is very relevant to the elaboration of the central teaching of the Gita.

Jayatirtha clarifies this points as -

युद्धादिकरणमेव बोधनीयभगवन्महिमादिकं किमर्थमुच्यते इत्यतो बोध यार्थमाह – स्वविहितेति।न केवल युद्धादि स्वविहितमात्र परमो धर्मः।येन तदेव बोध्यस्यात्।अपि तु भक्त्यादिकमपि।तत्रार्जुनस्य अधर्मशङ्कायामपि प्राप्तलोकोपकाराय समग्रधर्मो भगवता वोध्यते।

Sri Madhva finds support for all the tenets of his system in the very exposition of this Gitadharma. In the verse असत्यमप्रतिष्ठं ते

जगदाहुरनीश्वरम् the theory of Jagatmithyatva is rejected, the plurality of selves is clearly stated in

नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैवं न भविष्यामः सर्वे वयमतः परम्।।[17]

this was already painted out by Ramanuja as एवं भगवतः सर्वेश्वरादात्मनां परस्परं च भेदः परमार्थिक इति भगवतैवोक्तं प्रतीयते। Madhva rejects the contention of Sankar that देहभेदानुवृत्त्या बहुवचनम् नात्मभेदानुवृत्त्या, since what persist birth after birth is the soul and not the body. The view of some modern critics that "we cannot draw any conclusion about the ultimate nature of the soul from an occasional singular or plural usages' is not quite justified, since Madhva pointed out of large number of plural usages with reference of the Jiva Throughout the Gita

1. अशोच्यानन्वशोचः[18]
2. पुनर्जन्म नाप्नुवन्ति महात्मनः।[19]
3. मां ध्यायन्त उपासते[20]
4. ईश्वरः सर्वभूतानां[21]

are only few instances that may be mentioned here.

According to Madhva Plurality of selves persists even after liberation. Therefore, it is necessary to note his interpretation of the following passage.

1. ब्रह्मनिर्वाणमृच्छति।[22]
2. ब्रह्मयोगयुक्तात्मा।[23]

3. ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ।[24]

4. ब्रह्मभूयाय कल्पते ।[25]

5. यः प्रयाति स मद्भावम् ।[26]

Without losing oneself in hair-splitting grammatical explanations one may point out that Madhva explains these and similar other passages to signify the final resting of the soul in the supreme as indicated in the Brahmasutra अस्मिन्नस्य च तद्योगान्नास्ति or as mentioned in the Gita itself. ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ।[27] thus, not only he finds support for all his tenets in the Gita but declares that the doctrines of Atmaikya and jaganmithyatva are repudiated in the Gita.

Vi

On a number of crucial verses Sri Madhva's interpretations are far better and could be adopted without clash of doctrines. We may notice one or two here.

The line गतासूनगतासूश्च नानुशोचन्ति पण्डिताः ।[28] is ordinarily rendered as "wise man do not grieve for the dead and the living". However, Sri Madhva takes the word च here in the sense of इव. In the Mahabharat and in a few other place also च is used in the sense of इव. Nilakantha the commentator of the Mahabharat does assign this meaning to च (इवार्थः च). According to Sri Madhva the Important of the line is पण्डिताः अगतासूनिव गतासून् नानुशोचन्ति । Another instance of interpretational richness is in-

धूमेनाव्रियते वह्निः यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् । ।[29]

Here the significance of giving three similes in respect of one and the same point is beautifully brought out in the following manner :

1. यथा धूमेन अग्निः आवृतः प्रकाशरूपोऽपि न अन्येषां सम्यग्दर्शनाय तथा परमात्मा ।

2. यथा आदर्शमलेनावृतः अन्याभिव्यक्तिहेतुः न भवति तथा अन्तःकरणं परमात्मादेः व्यक्तिहेतुर्न भवति कामेनावृतम् ।

3. यथा उल्बनावृत्त्या बद्धो भवति गर्भः तथा कामेनावृतो जीवः ।

Thus, the three illustrations have reference to three types of Avarana operating in three different ways with reference to God, Soul and Antahkaran.

From the above brief sketch, it has become clear that Madhva has enriched the interpreting literature on the Gita by his distinct contribution both in respect of arriving at the central teaching of the Gita and offering striking interpretations of many crucial stanzas.

Reference Books -

1. Bhagavad Gita, Gita Press Gorakhpur.

2. Gita Bhashya By Madhvacharya

3. Gita Tatparya of Jayatirtha.

4. Gita Shamkarbhashya

5. Brahmasutra Shamkarabhashya.

References

1. BG 18.46
2. BG 3.35
3. BG 2.33
4. BG 7.7
5. BG 7.17
6. BG 15.18
7. BG 10.03
8. BG 10.2 (BG 10.8)
9. BG 7.7
10. BG 9.4
11. BG 9.4
12. BG 9.5
13. BG 2.47
14. BG 18.2
15. BG 18.6
16. BG 3.5
17. B.G. 2.12
18. B.G. 2.11
19. B.G. 8.15
20. B.G. 12.6
21. B.G. 18.61
22. B.G. 2.72
23. B.G. 5.21
24. B.G. 5.24
25. B.G. 14.26
26. B.G. 8.5
27. B.G. 11.54
28. B.G. 2.11
29. B.G. 3.28

---------- ೞ♦ೞ ----------

विविधशिक्षाग्रन्थेषु वर्णसंख्याविचारः

डॉ. जयवन्त चौधरी

---------- ೞ♦ೞ ----------

भारतीयसंस्कृतेराधारभूताः वेदाः ज्ञानविज्ञानस्याक्षयकोषाः। वेदेषु सम्पूर्णविश्वस्य संस्कृतेरेवं सभ्यतायाः इतिहासः समाहितः वर्तते। वेदानां गूढतत्त्वार्थं ज्ञातुं षडङ्गेन सहितब्राह्मणानां प्रातिशाख्यानां स्मृतिग्रन्थानामेवं पुराणानां विशदाध्ययनस्य नितान्तावश्यकता वर्तते, यतो ह्येतेषां ज्ञानार्जनानन्तरमेव वेदप्रतिपादितविषयाणां यथार्थं ज्ञातुं विशुद्धदृष्टिः लभ्यते। एषा विशुद्धदृष्टिरेव सुवर्णमयपात्रान्ते विद्यमानं सत्यार्थस्य साक्षात्कारार्थं समर्था भवति ।

व्याकरणमहाभाष्यस्य प्रणेता भगवान्पतञ्जलिः षडङ्गवेदाध्यनस्या–निवार्यतां प्रतिपादयन्वदति "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोध्येयो ज्ञेयश्च"[1] अर्थात् ब्राह्मणस्तु दृष्टफलस्यापेक्षया विनाभ्युदयायैवं निःश्रेयससाधकषडङ्ग–सहितवेदानां शब्दतः अध्ययनं तथा चार्थतः ज्ञानं प्राप्नुयात् ।

षडङ्गानि शिक्षाकल्पव्याकरणनिरुक्तज्यौतिषछन्दांसि च सन्ति।
शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ।।[2]

पाणिनीयशिक्षाकारोऽपि षडङ्गरूपवेदानां वैशिष्ट्यमेवमुवाच –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।

शिक्षा घ्राणन्तु वेदस्य, मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।[3]

षट्सु च वेदाङ्गेषु शिक्षायाः विशिष्टं स्थानं वरीवर्ति । यतो हि शिक्षा सस्वरं साधूच्चारणं शिक्षयति । विविधशिक्षाग्रन्थेषु साधूच्चारणसम्बद्धविचाराः विहिताः वर्तन्ते । यथा वर्णोत्पत्तिक्रमः, वर्णोच्चारणस्थानानि, वर्णसंख्या, उच्चारणस्य गुणाः इत्यादयः । एतेष्वेव वर्णसंख्याविचारः विविधशिक्षाग्रन्थेषु विशेष रूचिकरयेव ।

विभिन्नशिक्षकाराः वर्णानां संख्या भिन्ना–भिन्नैव स्वीकुर्वन्ति । कुत्र–कुत्र तु स्वराणां संख्याविषयेऽपि मतभिन्नता दृश्यते । केचनपाणिनीयशिक्षामप्यनुसरन्ति ।

प्रप्रथमं वयंपाणिनीयशिक्षायां वर्णसंख्यां पश्यामः । वागुच्चारणं वर्णैरेव जायते । अतः कति वर्णाः सन्तीति प्रश्नं समाधातुमाह शिक्षाकारः

त्रिषष्टिचतुष्षष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि, स्वयं प्रोक्ताः स्वयम्भुवा ।।
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता हयष्टौ चत्वारश्च यमाः स्मृताः ।।
अनुस्वारो विसर्गश्च ×क× पौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च ।।[4]

शिक्षाकारः त्रिषष्टिरथवा चतुष्षष्टिर्वर्णाः स्वीकरोति । आदौ वयं चतुष्षष्टिर्वर्णानां विभागमवलोकयामः । एकविंशति स्वराः, यथा –

स्वराः–	अ	आ	अ3
	इ	ई	इ3
	उ	ऊ	उ3
	ऋ	ॠ	ऋ3
	लृ		

ए	ए 3
ऐ	ऐ 3
ओ	ओ 3
औ	औं 3

योगः 21

पञ्चविंशतिः व्यञ्जनानि यथा –

कवर्गः –	क, ख, ग, घ, ङ
चवर्गः –	च, छ, ज, झ, ञ
टवर्गः –	ट, ठ, ड, ढ, न
पवर्गः –	प, फ, ब, भ, म

योगः 25

चत्वारः अन्तस्थाः, चत्वारः ऊष्माणः, चत्वारः यमाः

अन्तस्थाः	–	य, र, ल, व
ऊष्माणः	–	श, ष, स, ह
यमाः	–	कुँ, खुँ, गुँ, घुँ

योगः 12

अनुस्वारः (ं) विसर्गः (ः) जिह्वामूलीयः (क) उपध्मानीयः (प)
दुःस्पृष्टः लकारः

प्लुतः लृ 3
योगः – 04
योगः – 01
योगः – 01

एवमाहत्य चतुष्षष्टिर्वर्णाः सन्ति । केषांचित् विदुषां मते दुःस्पृष्टवर्णः केषांचित् च प्लुतः "लृ3" इति वर्णसंख्या त्रिषष्टिर्भवति ।

वस्तुतः पाणिनीयशिक्षायां दुःस्पृष्टेति शब्देन स्पष्टतया ळकारः नोक्तः। परन्त्वन्यशिक्षाग्रन्थेषु ळकारस्य स्पष्टतया वर्णनं दृश्यते । पाणिनीयशिक्षाकारः लृकारस्य प्लुतत्वमप्यङ्गीकरोतीति भाति।

याज्ञवल्क्यशिक्षा –

याज्ञवल्क्यशिक्षायां वर्णानामुपदेश एवं प्रकारेण वर्तते स्वरस्पर्शान्तस्थोष्माणः कण्ठ्यजिह्वामूलीयोपध्मानीयतालव्यमूर्धन्य–दन्त्यौष्ठ्ययमविसर्जनीयानुनासिक्य–रङ्गः[5] इति। अर्थात् अत्र शिक्षायां वर्णाः स्वराः, स्पर्शाः, अन्तस्थाः, उष्माणः, इत्येवं रीत्या वर्णिताः तथा च अवशिष्टाः अनुस्वार – जिह्वामूलीय–उपध्मानीय–नासिक्य अनुनासिक्य रङ्गः, तथा च चत्वारो यमाः कुँ, खुँ, गुँ, घुँ, इत्येवं प्रकारेणोक्ताः। वस्तुतः याज्ञवल्क्यशिक्षायां वर्णसंख्या पाणिनीयशिक्षावत् स्पष्टा नोक्ता चेदपि वयं शिक्षाया अध्ययनेन ज्ञातुं शक्नुमः यत् अत्राहत्य वर्णानां संख्या सप्तषष्टिरथवाष्टषष्टिः भविष्यति। याज्ञवल्क्यशिक्षायां स्वराणां संख्या विंशतिरथवा त्रयोविंशतिः वर्तते । यतो हि शिक्षायामुक्तम् "लृकारस्य तु दीर्घत्वं नास्ति वाजसनेयिनः"[6] अर्थात् वाजसनेयिशाखायां दीर्घलृकारस्य निषेधात् स्वराणां संख्या द्वाविंशतिः भविष्यति। तस्य ग्रहणात् तेन सह वा स्वराणां संख्या भविष्यति त्रयोविंशतिः। द्वाविंशतिरथवा त्रयोविंशतिः स्वराः, पञ्चविंशतिः व्यञ्जनानि, चत्वारोऽन्तःस्थाः, चत्वार ऊष्माणः, विसर्गजिह्वामूलीयौ द्वावनुस्वारौ ह्रस्वः, दीर्घश्चेत्येवमाहत्य सप्तषष्टि–रथवाष्टषष्टिः संख्या भविष्यति।

माण्डुकीशिक्षा

शिक्षायामस्यामपि वर्णानां संख्या स्पष्टतया नोक्ता। तथापि सूक्ष्माध्ययनेन ज्ञायते यत् माण्डुकी–शिक्षाकारः सप्तषष्टिः वर्णान् स्वीकरोति। तद्यथा

स्पर्शानां करणं स्पृष्टमन्तस्थानामतोऽन्यथा।
यमानां संवृतं प्राहुर्विवृतं च स्वरोष्मणाम्।।[7]

ओभावश्च विवृत्तिश्च शषसा रेफ एव च।
जिह्वामूलीयमुपध्मा च गतिरष्टविधोष्मणः।।[8]

न च रेफानुस्वारो विसर्जनीये तु सर्वत्र।[9]

अनुस्वाराश्च कर्तव्या ह्रस्वदीर्घप्लुतास्त्रयः।।[10]

नासादुत्पद्यते रङ्गः।11

एतान् श्लोकांशान् पश्यामश्चेत् ज्ञायते यत् माण्डुक्यां सप्तषष्टिः वर्णाः सन्ति। कथमिति? त्रयोविंशतिः स्वराः, स्वरेष्वपि दीर्घलृकारस्य विषये न किमपि प्रतिपादितम्। तथापि तस्य शिक्षान्तरेषु प्रतिपादनात् तमादायेयं स्वरसंख्या उक्ता। पञ्चविंशतिः स्पर्शाः, चत्वारोऽन्तस्थाः, चत्वार ऊष्माणः, चत्वारो यमाः, विसर्गः, जिह्वामूलीयः, उपध्मानीयः, ह्रस्वः, दीर्घः, प्लुतश्चेति त्रयः अनुस्वाराः, रङ्गः इति।

अत्रावधेयः अंशः यत् पाणिनीयशिक्षातः अस्यां शिक्षायां त्रयः वर्णाः अधिकाः उक्ताः, द्वावनुस्वारौ, दीर्घलृकारश्चेति। दुःस्पृष्टळकारस्तु नात्र स्पृष्टः। एवमथर्ववेदे दुःस्पृष्टळकारस्य अप्रयोगादथर्वानुसारिणि माण्डूकि–शिक्षेति वयं वक्तुं शक्नुमः।

वर्णरत्नप्रदीपिकाख्याशिक्षा

वस्तुतो वर्णरत्नप्रदीपिकाख्यशिक्षायां पाणिनीयशिक्षावत् वर्णानां संख्या नोक्ता। परन्तु शिक्षापठनेन सरलतया ज्ञातुं शक्नुमः यदस्यां शिक्षायां त्रिषष्टिर्वर्णास्सन्ति। तद्यथा –

एकविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः।
द्विगुणानि व्यञ्जनानि ह्येतावान् वर्णसंग्रहः।।

ऋपर्यन्ताः स्वरास्त्रेधा लृकारो ह्रस्व एव च ।
सन्ध्यक्षराणि ह्रस्वानि ते चैवमेकविंशतिः ।।

ककारादिमकारान्ताः स्पर्शाः स्युः पञ्चविंशतिः ।
स्पर्शानां पञ्चमैर्योगे चत्वारश्च यमाः स्मृताः ।।

अनुस्वारो विसर्गश्च जिह्वामूलीय एव च ।
उपध्मानीय इति च दुःस्पृष्टश्च तथापरः ।।[12]

अत्र स्पष्टतया त्रिषष्टिवर्णानां गणना भवितुं शक्नोति ।एतावान् विशेषः यत् पाणिनीयशिक्षायां प्लुतलृकारमङ्गीकृत्य चतुषष्टिर्वर्णा अप्युक्ताः, परन्त्विह तु प्लुतलृकारो न निर्दिष्टः ।अन्यच्च पाणिनीयशिक्षायामुक्तः रङ्गवर्णोऽप्यत्र न प्रतिपादितः । शिक्षायामस्यां दुस्पृष्टः लकारोऽपि स्वीकृतः वर्तते ।
वर्णानां विभागः एवं क्रमेण भविष्यति–एकविंशतिस्स्वराः, पञ्चविंशतिस्पर्शाः, चत्वारोऽन्तस्थाः, चत्वार ऊष्माणः, चत्वारः यमा, अनुस्वारः, विसर्गः, जिह्वामूलीयः, उपध्मानीयः, दुःस्पृष्टश्चैकैकः, एवं रूपेण वर्णरत्नप्रदीपिकाख्यायां शिक्षायामाहत्य त्रिषष्टिः वर्णास्सन्ति ।

औदव्राजिशिक्षा

यद्यप्येतावतौदव्राजिशिक्षानामक कश्चनः ग्रन्थः नोपलब्धः । परन्तु पाणिनीयशिक्षापञ्चिकायामौदव्राजेः वर्णविषयकाः केचन श्लोका उदधृताः– यथा–

ह्रस्वादिभैदैश्चत्वारः प्रथमा द्वादश स्मृताः ।
लृकारो ह्रस्व एवैचोऽष्टौ स्वरा एकविंशतिः ।।

पञ्चविंशतिरष्टाभिः स्पर्शाः स्युर्यादयो यमाः ।
अनुस्वारो विसर्गश्च ﾜ क ﾜ पौ प्लुतलृकारकः ।

त्रिषष्टिरेवं वर्णाः स्युर्ह्रस्वदीर्घादिभेदतः ।
अनुस्वारद्वयाद्वर्णाश्चतुः षष्टिरितीरिताः ।।[13]

अर्थात् पाणिनीयशिक्षावदेवौदव्राजिमतानुसारमपि वर्णानां संख्या चतुषष्टिरेव ।अत्र विशेषः इत्युक्ते औदव्राजिकारः पाणिनीयशिक्षावत् दुःस्पृष्टाख्यं ळकारमस्वीकृत्य चतुषष्टिस्संख्यापूर्ति तु अनुस्वारस्य ह्रस्वदीर्घभेदेन द्वैविध्यमङ्गीकृत्य करोति ।

षोडशश्लोकी शिक्षा –

षोडषश्लोकिशिक्षायां स्पष्टतया वर्णानां संख्या उक्ता वर्तते, यथा –

त्रयस्त्रिंशद्वसावर्णाः स्वराः द्वाविंशतिर्यमाः ।
चत्वारश्च विसर्गोऽनुस्वारः ﾜ क ﾜ पास्त्रिषष्टिकाः ।।[15-क]

अस्यां शिक्षायां स्पष्टतया त्रिषष्टिवर्णाः प्रतिपादिताः । ते च द्वाविंशतिस्स्वराः, त्रयस्त्रिंशत् व्यञ्जनानि, चत्वारो यमाः, अनुस्वारविसर्ग–जिहवामूलीयोपध्मानीयाश्च ! अस्यां शिक्षायामपि द्वाविंशतिस्स्वरसंख्या–प्रतिपादनेन दीर्घलृकारग्रहणं न कृतं शिक्षाकारैः इति प्रतिभाति ।यद्यप्यत्र पाणिनीयशिक्षायां व त्रिषष्टिवर्णाः प्रतिपादिताः चेदपि दुःस्पृष्टः, रङ्गश्चात्र न निर्दिष्टौ ।

गौतमी शिक्षा –

अस्यां शिक्षायां वर्णानां संख्या नोक्ता शिक्षाकर्त्रा । वर्णानां विभागः तु शिक्षायामेव वर्तते ।तद्यथा –

"अथ त्रयस्त्रिंशत् व्यञ्जनानि भवन्ति । स्पर्शान्तस्थोष्माणश्चेति । ककारादयो मकारपर्यन्ताः स्पर्शाः पञ्चविंशतिश्चत्वारस्ते यरलवाश्चत्वार

ऊष्माणस्ते हशषसाः चत्वारस्ते यमास्ते कुँ, खुँ, गुँ, घुँ, इति । अनेकं व्यञ्जनं यत्रोपर्युपरि संयुक्तं तत्संयोगसञ्ज्ञं भवति इत्यस्वरञ्च पूर्वमक्षरम् ।[15-ख]

अस्याशिक्षायास्सूक्ष्माध्ययनेन ज्ञायते यत् अत्र केवलं पञ्चविंशतिस्पर्शाः चत्वारोऽन्तस्थाः, चत्वार ऊष्माणः, चत्वारः यमाः, इत्येतावत् वर्णानामेव गणना वर्तते । रङ्ग, दुःस्पृष्टळकारः अनुस्वारः, विसर्गः, जिह्वामूलीयः, उपध्मानीयः, इत्यादिवर्णानां नैवात्र ग्रहणं कृतं नैव च तिरस्कृतम् । शिक्षायां स्वराणामुल्लेखः तु लभ्यते, परन्तु तेषां संख्या नोक्ता । स्वराणां संख्याभावात् तथा च कस्यापि वर्णस्य विषये सम्मतिरप्यत्र नोपलभ्यते । अत आहत्य वर्णानां संख्यां निश्चिततया वक्तुं न पारयामः ।

स्वराष्टकशिक्षा

अस्याशिक्षायाः यथा नामास्ति तथैव शिक्षायामप्यष्टौ स्वराः उक्ताः । यथा अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इत्यष्टौ स्वराः ।[16] वस्तुतोऽत्र शङ्का भवितुं शक्यते यत् शिक्षायाः नाम्नि "अष्ट" इति शब्दः वर्तते, "स्वराष्टक" इति तथा च शिक्षायामपि "इत्यष्टौ स्वराः" इत्युक्तं परन्तु शिक्षायामुक्तान् स्वरान् गणयामश्चेत् ज्ञायते स्वरास्तु नव सन्ति । अस्य समाधानमहमेवं चिन्तयामि यत् कदाचित् शिक्षाकारेण ऋकारलृकारयोस्सावर्ण्यं मत्वा स्वराणामष्टसंख्योक्ता स्यात् । एवमेव समाधानं "पाणिनीयशिक्षायाः शिक्षान्तरैः सह समीक्षा" पुस्तकस्य लेखकः डॉ. मधुकर पाठक महोदयेनापि कृतं वर्तते ।[17]

शिक्षान्ते पाणिनीयमाहेश्वरसूत्राणामुल्लेखः दृश्यते परन्तु तेषां संख्या विषये अत्र किमपि नोक्तम् । अनेन ज्ञायते यत् पाणिनीयशिक्षाविषये शिक्षाकारस्य सम्मतिरेवास्ति ।

शैशरीय–शिक्षा–

शैशरीयशिक्षायामपि पाणिनीयशिक्षावत् त्रिषष्टिश्चतुषष्टिश्चेति भेदेन वर्णाः व्याख्याताः । यथा –

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ।।
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ।।
अनुस्वारो विसर्गश्च ळकारश्च तथैव च ।
दुःस्पृष्टश्चेति विज्ञेयो नासिक्यं रङ्गमुच्यते ।
जिह्वामूलीय इत्युक्त उपध्मानीयमेव च ।।[19]

अत्र वर्णानां विभाग एवं रूपेण दृश्यते एकविंशतिस्स्वराः, पञ्चविंशतिस्स्पर्शाः, चत्वारोऽन्तस्थाः, चत्वारः यमाः, अनुस्वारः, विसर्गः, ळकारः, रङ्गः, जिह्वामूलीयः, उपध्मानीयः । अस्यां शिक्षायां विशेषो यदत्र दीर्घ लृकारः नोक्तः । अपि तु तत्स्थाने रङ्गवर्णो विहितः । द्वितीयञ्च पाणिनीयशिक्षायां ळकारः दुष्पृष्टशब्देनोक्तः[20] न तु साक्षात् शैशरीयशिक्षेव "ळकार" इत्युक्तः । शैशरीये तु स्पष्टतया दुःस्पृष्टशब्देन ळकारस्य ग्रहणं कृतं वर्तते । एतत् विहाय पाणिनीयशिक्षात अन्या काऽपि विशेषता अत्र न दृश्यते ।

व्यासशिक्षा –

व्यासशिक्षायामपि वर्णानां संख्या स्पष्टतया नोक्ता परन्त्वध्ययनेन ज्ञायते यत् षट्पञ्चाशत् वर्णान् अभिप्रैति शिक्षाकारः । यथा –

अवर्णे सर्णको वर्णा ऋवर्णो लृत्वमेत्वमैत् ।
ओद्रौद्रङ्गौ क्रमादोमूत्स्वराः स्युर्व्यञ्चनान्यथ ।
कादिमान्ताः स्मृताः स्पर्शा अन्तस्था यादिवोत्तराः ।
जिह्वामूलादिहातांश्च षडूष्माणः उदीरिताः ।।[21]

अत्र एकोनविंशतिः स्वराः प्रतिपादिताः ते च अ आ अ 3, इ, ई, इ 3, उ, ऊ, उ3, ऋ, ॠ, ए, ऐ, ओ, औ, द्वौ रङ्गौ, ओम्, इति। परन्तु स्वराणां संख्या साक्षात् नोक्ता। स्पर्शाः, अन्तस्थाः, शषसहाः, अनुस्वारविसर्गजिह्वामूलीयोपाध्मानीयाश्च इति षट्पञ्चाशत् वर्णाः भवन्ति। यमाः ळकारः, प्लुताः, ऋ, लृ, ए, ऐ, ओ, औ एते वर्णाः तु अत्र नोक्ताः। रङ्गवर्णः तु स्वरेष्वेव गणितः। अत्र पाणिनीयशिक्षातः विशेषः इत्युक्ते ओमिति एकः स्वतन्त्रो वर्णः स्वीकृतः। परन्तु अस्यां शिक्षायां पाणिनीय शिक्षातः नववर्णाः न्यूनाः उक्ताः।

पारिशिक्षा –

पारिशिक्षायां स्पष्टतया वर्णानां संख्या वस्तुतः नोक्ता। परन्तु शिक्षाया अध्ययनेन ज्ञायते यत् अस्यां वर्णानां संख्या चतुः पञ्चाशत् वर्तते। यथा –

ह्रस्वदीर्घ प्लुता वर्णे वर्णो वर्णा ऋ ॠ लृ च।
एदैदोदौदिति ज्ञेयाः षोडशादितः स्वराः।
कखौ गघौ रवौग ङ च, छ जा झञौ ट, ठ ड, ढ ण ताः।।
थदो धनौ पफबभमा स्पशाः पञ्चविशतिः।
यवौ रलौ चतस्त्रोऽन्तस्थाः कशषसाः पहाः।।
स्वराः स्पर्शास्तथान्तस्थाः उष्माणश्चाथ दर्शिताः।
विसर्गानुस्वारळश्चानुनासिक्याः पंचचोदिताः।।[22]

अस्यां शिक्षायां स्वरसंख्याविषये काचन विशेषता वर्तते। अस्यां स्वराणां संख्या षोडश एव प्रतिपादिताः ते च अ, आ, अ 3, इ, ई, इ3, उ, ऊ, उ3, ऋ, ॠ, लृ, ए, ऐ, ओ, औ, इति। स्पर्शाः तु पञ्चविंशतिरेव। चत्वारोऽन्तस्थाः, चत्वारः, ऊष्माणः जिह्वामूलीयः उपध्मानीयः, विसर्गः, अनुस्वारः, ळकारश्च एवमाहत्य चतुःपञ्चाशद्वर्णानां संकेतोऽत्रोपलभ्यते। द्वितीयविशेषता नाम अत्र दुःस्पृष्टळकारस्तु स्पष्टतयोक्तः। तृतीयमत्र यमाः नोक्ताः एव। यमानां

परिगणनविषये डॉ. मधुकर भट्टः वदति "यमानाम् अत्र अपरिगणनं तु तेषां वैदिकवाङ्मयमात्रविषयतया संभवेत्।"[23]

निष्कर्ष :–

एवं प्रकारेण विविधशिक्षाग्रन्थेषु वर्णसंख्याविषयकविचारः दृश्यते। इतोऽपि बहवः शिक्षाग्रन्थाः सन्ति। यथा लोमशी, पाराशरी, लघ्वमोघा, नन्दिनी इत्यादयः। परन्त्वेतेषु शिक्षाग्रन्थेषु वर्णसमाम्नायविषयः तु कुत्रापि न दृग्गोचरी भवति। तथा च नापि तत्र वर्णानां स्थानप्रयत्नादयः निर्दिष्टाः। अत एव तदभिप्रेताः के के वर्णाः इति वयं ज्ञातुं न शक्नुमः।

सन्दर्भसूची

1) व्याकरणमहाभाष्य (पस्पशाह्निकम्)
2) अमरकोशः (स्वर्गादिवर्गः)
3) पाणिनीयशिक्षा श्लो. 41, 42
4) पाणिनीयशिक्षा श्लो. 3, 4, 5
5) याज्ञवल्क्यशिक्षा श्लो. 86
6) याज्ञवल्क्यशिक्षा श्लो. 126
7) अथर्ववेदीयमाण्डूकीशिक्षा श्लो. 71
8) अथर्ववेदीयमाण्डूकीशिक्षा श्लो. 107
9) अथर्ववेदीयमाण्डूकीशिक्षा श्लो. 130
10) अथर्ववेदीयमाण्डूकीशिक्षा श्लो. 92
11) अथर्ववेदीयमाण्डूकीशिक्षा श्लो. 114
12) वर्णरत्नप्रदीपिकाख्या शिक्षा श्लो. 11–15
13) पाणिनीयशिक्षापञ्चिका (पाणिनीयशिक्षायाः शिक्षान्तरैः सह समीक्षा)
14) षोडशश्लोकी शिक्षा श्लो. 2
15–क) गौतमीशिक्षा, प्रथमप्रपाठक

15–ख) गौतमीशिक्षा, प्रथमप्रपाठक
16) स्वराष्टकशिक्षा – 1
17) पाणिनीयशिक्षायाः शिक्षान्तरैः सह समीक्षा पृ. 58
18) स्वराष्टकशिक्षा – 1
19) शैशीरीयशिक्षा
20) ''दुःस्पृष्टश्चेति विज्ञेयः'' पाणिनीयशिक्षा श्लो. 5
21) व्यासशिक्षा
22) पारिशिक्षा
23) पाणिनीयशिक्षायाः शिक्षान्तरैः सह समीक्षा पृ. 58

सन्दर्भग्रन्थाः

1) व्याकरण महाभाष्यम्,
चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
2) अमरकोशः,
चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
3) शिक्षासंग्रहः,
आचार्य श्रीरामप्रसादत्रिपाठी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी
4) पाणिनीयशिक्षायाः शिक्षान्तरै सह समीक्षा,
डॉ. मधुकर पाठक, वाराणसेय, संस्कृत विश्वविद्यालय 1972
5) पाणिनीयशिक्षा,
चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली

हयवरट्सूत्रविषये सुधानिधिकृन्मतसमीक्षा

– डॉ. पङ्कजकुमारव्यासः

अथेदानीं हयरवट्सूत्रविषये व्याकरणसिद्धान्तसुधानिधिकृन्मतं समीक्षामहे । तत्रेदं ग्रन्थविषये वक्तव्यं यच्छब्दकौस्तुभमादर्शीकृत्य महाभाष्यव्याख्यानभूतं सिद्धान्तसुधानिध्याख्यं ग्रन्थरत्नं शब्दकौस्तुभखण्डनाय प्रणिनाय कूर्माचलवास्तव्यो लक्ष्मीधरसूनुः पाण्डेयोपाह्व आचार्यविश्वेश्वरसूरिः । तत्र विद्यमानं हयवरट्सूत्रविषये तन्मतमादित उपस्थाप्यते । तन्मतयुक्तायुक्तविवेचने प्रवर्तामहे ।

वर्णसमाम्नाये सर्वोऽपि वर्णः सकृदेवोपदिष्टः । हकारस्तु ''हयरवट्''सूत्रे ''हल्''सूत्रे च द्विरुपदिष्टः । तत्र द्विरुपदेशस्य किं प्रयोजनमिति संशयो जायते । तत्रादौ ''हयरवट्''सूत्रे हकारोपदेशस्य प्रयोजनम् अट्–अश्–हश्–इण्–प्रत्याहाराघटितसूत्रेषु हकारग्रहणं, तद्यथा –

1) अट्–अर्हेण । अर्हशब्दात् तृतीयैकवचने ''टाङसिङसामिनात्स्याः'' (पा. सू. 7–1–92) इति सूत्रेण इनादेशः, ''आद्गुणः'' (पा.सू. 6–1–87) इति गुणे अर्हेन इति जाते ''अट्कुप्वाङ्नुमव्यवायेऽपि'' (पा.सू. 8–4–2) इति नकारस्य णत्वम् ।

2) अश् – महान् + हि इति स्थिते ''दीर्घादटि समानपदे'' (पा.सू. 8–3–9) इति नकारस्य रुत्वे ''आतोऽटि नित्यम्'' (पा.सू. 8–3–3) इत्यनुनासिकः, ''भोभगोअघोअपूर्वस्य योऽशि'' (पा.सू. 8–3–17) इति अश परे यत्वम् । ''हलि सर्वेषाम्'' (पा.सू. 8–3–22) इति यलोपः ।

3) हश् – ब्राह्मणो हसतीत्यत्र ब्राह्मण + सु + हसति इति स्थिते ''ससजुषो रुः'' (पा.सू. 8–2–66) इति रुत्वम् । ''हशि च'' (पा.सू. 6–1–114)

इति रोरुत्वम् । "नादिचि" (पा.सू. 6–1–104) इति निषेधात् "प्रथमयोः पूर्वसवर्णः" (पा.सू. 6–1–102) इति पूर्वसवर्णदीर्घो न भवति । "आद्गुणः" (पा.सू. 6–1–87) इति गुणे ब्राह्मणो हसतीति सिद्ध्यति ।

4) इण् – लिलिहिढ्वे–लिलिहिध्वे । लिह् –धातोः "परोक्षे लिट्— (पा.सू. 3–2–115) इति लिटि, तिप्तस्झीत्यादिना सूत्रेण मध्यमपुरुषबहुवचने ध्वमि "टित आत्मनेपदानां टेरे" (पा.सू. 3–4–79) इति अमः स्थाने एत्वे "लिटि धातोरनभ्यासस्य" (पा.सू. 6–1–8) इति द्वित्वेऽभ्यासकार्ये "असंयोगाल्लिट् कित्" (पा.सू. 1–2–5) इति कित्वान्न लघूपधगुणः । लिह्–धातोरनिट्त्वेन "आर्धधातुकस्येड्वलादेः" (पा.सू. 7–2–35) इति सूत्रेण प्राप्तस्येडागमस्य "एकाच उपदेशेऽनुदात्तात्" (पा.सू. 7–2–10) इति इण्निषेधे प्राप्ते "कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि" (पा.सू. 7–2–13) इति नियमेन इट् । हकाररूपादिटः "विभाषेटः" (पा.सू. 8–3–76) इति धकारस्य वा मूर्धन्यः । लिलिहिढ्वे इति, पक्षे लिलिहिध्वे । एवं हकारस्य प्रथमोपदेशे प्रयोजनानि ।

एवमक्षरसमाम्नाये द्वितीयहकारोपदेशे वल्–रल्–झल्–शल्षु हकारग्रहणप्रयोजनम् ।

1) वलि – रुदिहि, स्वपिहि । रुदधातोर्लोटि परस्मैपदे मध्यमपुरुषैकवचने सिपि "सेर्ह्यपिच्च" (पा.सू. 3–4–87) इति हिः । "रुदादिभ्यः सार्वधातुके" (पा.सू. 7–2–76) इति वलादेः सार्वधातुकस्य इट् । एवं स्वप्–धातोः स्वपिहि ।

2) रलि – स्निहित्वा/स्नेहित्वा । "ष्णिह्" प्रीतौ इति धातोः "समानकर्तृकयोः पूर्वकाले" (पा.सू. 3–4–21) इति क्त्वा । "आर्धधातुकस्येड्वलादेः" (पा. सू. 7–2–35) इति इट्, "रलो व्युपधाद्धलादेः संश्च" (पा.सू. 1–2–26) इति वा कित्त्वम् । कित्त्वपक्षे "क्ङिति च" (पा.सू. 1–1–5) इति गुणनिषेधे

स्निहित्वा, पक्षे गुणः, स्नेहित्वा । एवं ष्णिहधातोः सनि पूर्वसूत्रेण वा कित्त्वे सिस्निहिषति, पक्षे सिस्नेहिषति इत्यपि ।

3) झलि – अदाग्धाम् । दहधातेर्लुङि प्रथमपुरुषद्विवचने तसि, अडागमे, "तस्थस्थमिपां तान्तन्तामः" (पा.सू. 3–4–101) इति तामादेशः । ततः च्लौ, च्लेः सिचि, "झलो झलि" (पा.सू. 8–2–23) इति सिचो लोपः । "दादेधातोर्घः" (पा.सू. 8–2–32) इति घत्वे, "झषस्तथोर्धोऽधः" (पा.सू. 8–4–40) इति धत्वे, "वदव्रजहलन्तस्याचः" (पा.सू. 7–2–3) इति वृद्धौ आकारे अदाग्धाम् ।

4) शलि – अलिक्षत् । लिहधातोर्लुङि अडागमे परस्पमैपदे प्रथमपुरुषैकवचने तिपि इतश्चेतीकारलोपे, च्लौ, तस्य सिजादेशे प्राप्ते तं बाधित्वा "शल इगुपधादनिटः क्सः" (पा.सू. 3–1–45) इति क्सः । कित्त्वान्न गुणः । "हो ढः" (पा.सू. 8–2–31) इति ढत्वे, "षढोः कः सि" (पा.सू. 8–2–41) इति कत्वे, कात्परत्वेन सस्य षत्वे अलिक्षत् । अनया रीत्या हकारस्य द्विरुपदेशप्रयोजनानि स्पष्टं प्रतिपादितानि कौस्तुभोक्तदिशा सुधानिधौ ।[1]

एतावता कौस्तुभदिशा सूत्रं व्याचक्षाणः सुधानिधिकृद् हकारोपदेशः अट्–अश्–हश्–इण्–ग्रहणेषु हकारग्रहणार्थ इति प्रयोजनचतुष्टये न्यूनतां प्रदर्शयन् नव्यानां कौस्तुभेतरं प्रसङ्गमानीय – "नव्यास्तु प्रथमोपदेशस्य" इत्यादिना उपस्थापयति । तथा हि – "नव्यास्तु प्रथमोपदेशस्य अम् प्रत्याहारे ग्रहणमपि प्रयोजनम् । प्रयोजनचतुष्टयस्य नियमस्य भाष्येऽनुक्तत्वात् । ककारहकाररूपव्यञ्जनानुकरणे पुंसः क्वौ इति समासे "पुमः खय्यम्परे" इति रुत्वं प्रयोजनम् ।

यत्तु कारप्रत्ययस्यावश्यकतया नैतयोरान्तर्यं सम्भवतीति तन्न "बहुलमेव तद्विधानम्" इति कौस्तुभादावुक्तत्वात् । एतेन "स्कोः संयोगाद्योः" इत्यादौ छान्दस एव तदभावः । "उच्चेस्तरां वा वषट्कारः" इत्यादौ पदादपि

कारप्रत्ययोत्पत्तिवदिति निरस्तम् । छान्दसत्वापेक्षया वैकल्पिकप्रवृत्तिरूपबाहुलकस्यैव युक्तत्वात् । सवर्णसंज्ञासूत्रे चशयोः कङयोः शषसविसर्जनीयेत्वादिकौस्तुभप्रयोगाणां तत्तत्सूत्रव्याख्याने प्राचीनार्वाचीनानेकप्रयोगाणां 'कः खो गो घोश्च लक्ष्मीं वितरती' त्यादिभामत्यादिपयोगाणां च छान्दसत्वेन साधयितुमशक्यत्वाच्च। केवलव्यञ्जनोत्तरमभियुक्तानां कारप्रयोगस्य कुत्राप्यदर्शनाच्च ।[2]"

प्रकृतमतसमीक्षा – प्रौढमनोरमायामपि हयवरट् इत्यत्र हकारग्रहणप्रयोजनं स्थलचतुष्टये प्रदर्श्य तदुदाहरणानि दर्शितानि । तद्व्याख्यानभूतलघुशब्दरत्ने "इण्ग्रहणेष्विति" इति प्रतीकमुदधृत्य नन्विदं न्यूनम्, अम्ग्रहणेऽपि ग्रहणात् । फलं तु 'बहुपुम्क्ह' इत्यादौ "पुमः खय्यम्परे" 8–3–6 इति रुत्वम् ।[3] इत्येवं पङ्क्तिः दृश्यते । पङ्क्तेराशयोऽपि तुल्यः । परन्तु प्रकृते यः प्रसङ्ग आनीतः स तु बृहच्छब्दरत्नादुपस्थापितः[4] इति । इत्यनया रीत्या सुधानिधिकृता पुंसः क्हौ इत्यत्र समासप्रसङ्गे रुत्वप्रसङ्ग इत्युदाहृतम् लघुशब्दरत्नापेक्षया भिन्नतया । एतन्मते "षष्ठी" 2–2–8 इति सूत्रेण समासे, "सुपो धातुप्रातिपदिकयोः" 2–4–71 इति सुब्लुकि संयोगान्तलोपे पुम्क्हौ इत्यवस्थायाम् "पुमः खय्यम्परे" 8–3–6 इति रुत्वप्रसङ्गः ।

लघुशब्दरत्ने तु बहवः पुमांसो यस्येति बहुव्रीहौ "शेषाद्विभाषा" 5–4–154 इत्यत्र विभाषाग्रहणात् "उरः प्रभृतिभ्यः कप्" 5–4–150 इत्यत्र एकवचनान्तपुंस्–शब्दस्य पाठान्न कप् इत्यादिप्रक्रिया आदृता । अत्र सुधानिधिकारेण बृहच्छब्दरत्नरीत्या प्रदर्शित उदाहरणे पूर्वोक्तक्लिष्टकल्पनाऽनपेक्षिता । तथा हि "षष्ठी" समासे कपोऽप्रसक्तिः, तस्य बहुव्रीहेरेव विधानात् ।

अतो विभाषाग्रहणेन, उरः प्रभृतिषु च पुम्स् इति एकवचनान्तपाठेन कपो वारणं गौरवास्पदम् । न च षष्ठीसमासे पुंसः इति षष्ठीश्रवणात् पुंसः किम्? इति प्रश्ने कस्यापि गौरवास्पदम् । न च षष्ठीसमासे पुंसः इति षष्ठीश्रवणात् पुंसः किम् ? इति प्रश्ने कस्यापि सापेक्षपदार्थाभावात् नैतदुदाहरणं सङ्गतमिति

वाच्यम्। क्–ह्– इत्येतन्न सम्बध्यते, अतः वाक्ये उभयोः समभिव्याहृतत्वकल्पनयैव तस्य सङ्गतत्वात् ।

अतः सुधानिधिकृदुक्तोदाहरणे अम्प्रत्याहारे पकारग्रहणस्य प्रयोजनचिन्तायां किञ्चिल्लाघवम्। परन्तु सुधानिधिकृता मध्ये कारप्रत्ययस्यावश्यकताप्रदर्शनपरमतोपस्थापने कौस्तुभादौ तदुक्तमिति यत्प्रतिपादितम्, तत्तस्यानवधानप्रसङ्गः।

कौस्तुभे कुत्रापि एतादृश्याः शङ्काया अनुत्थापनात् । यद्यपि शङ्केयं कौस्तुभे दृश्यते अइउण् सूत्रे संहिताभावविचारप्रसङ्गे कारप्रत्ययस्तु न भवति । बाहुलकादित्यादि ।[5] तथापि स प्रसङ्गः भिन्नः । तत्प्रसङ्गमादाय कौस्तुभादाविति कथनमनवधानप्रसङ्गमात्रमुत लेखकप्रमाद इत्येव वक्तव्यम् । यद्वा आदिशब्देन बृहच्छब्दरत्नकारो ग्राह्यः, तेन तत्र एवं शङ्कितत्वादिति वा समाधेयम्। शङ्कोत्तरं यश्च कारप्रत्ययपरिहारः सूचितः, स तु स्वीकार्य एव । अनने "स्कोः संयोगाद्योः" इत्यादौ छान्दसत्वाभावः लाघवाय। लघुशब्दरत्ने च समर्थितमेतत् "स्कोरित्यादिस्तु सौत्रः प्रयोगः"[6] इति ।

यद्यपि तत्र क्–ह् इत्यादौ जश्त्ववारणाय "सुट्तिथोः" 3–4–107 इत्यादाविकारस्योच्चारणात् शास्त्राबोधिताजव्यवहितहल्समुदायस्यासाधुत्व–बोधनपरे "उच्चैरुदात्तः" 1–1–29 इति सूत्रभाष्ये – "न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति" इति भाष्याशयात्स्कोरित्यादीनामसाधुता–पत्तिपरिहारायोक्तत्वात्, अत्र च कारप्रत्ययपरिहाराय चास्या उक्तेराश्रयणे प्रयोजनभेदो दृश्यते। तथापि फलसाम्यान्न दोषः। उभयत्रापि पदत्वमाशङ्क्यैव संशयोत्पादनात् । तदुत्तरग्रन्थे च सुधानिधिकृता सैव शङ्कोत्थापिता । तद्यथा – यद्यपि "झलां जशोऽन्ते" 8–2–39 इति जश्भावस्य दुर्वारत्वात् हकारस्य खय्परत्वं नास्तीत्यादिना ग्रन्थेन । तत्र बहून् विचारान् प्रकृत्योपसंहारन्तु इत्थं करोति –

''मन्मते तु जश्त्वे नास्ति प्रसङ्गः । न च तस्यासिद्धत्वम् । त्रितयापेक्षयापि पूर्वत्वात् । तस्मात् पदान्तगतसकारभकाराभावप्रतिपादक–भाष्यबलादीदृशस्थले जश्त्वादिकमनभिधानं वाऽवश्यमाश्रयणीयम् ।अन्यथा क्श्ह् इत्याहेत्यादौ संयोगादिलोपस्य प्रसक्त्या ''सङि''इति वचनावश्यकत्वे ''परेश्च घाङ्कयोः'' 8–2–22 इति सूत्रगततत्खण्डनपरभाष्यविरोधाच्चेति ।तदप्यसत्, अतिप्रसङ्गस्थले तद्बलादनभिधानेऽपि प्रकृते बाधकाभावात् । न ह्यत्र संयोगादिलोपप्रसक्तिः संयोगस्य झल्परत्वाभावात्, पदान्तत्वाभावाच्च । न चान्तर्वर्तिविभक्त्या प्रकृते ह्–इत्यस्य पदान्तत्वम्, उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणनिषेधाच्च । पुम् तह् इत्याद्यनुकरणेऽपि प्रयोजनसम्भवाच्च । तत् श्हौ इत्यत्र ''छत्वममीति प्रयोजनमस्तीति केचित् । तच्चिन्त्यम्, यथाश्रुते अट्प्रयोजनोक्त्यैव क्रोडीकृतत्वात् तस्मादमि प्रयोजनं दुर्वारमिति दिक् ।[7]''

अनेन प्रघट्टकेन स्पष्टं प्रतीयते यत् सुधानिधिकृतोऽपि नव्यमतमिव अम्यपि प्रयोजनमित्यत्रैव नैर्भर्यम् ।अत एव ''नव्यास्तु'' इत्यारभ्य ''तस्मादमि प्रयोजनं दुर्वारमिति दिक्'' इत्येतावता ग्रन्थेन समाप्य मतान्तरं तु नोपस्थापितम् । अनेन बृहच्छब्दरत्नकारेण अस्य साम्यं लघुशब्दरत्नकारेण तु वैषम्यमित्यायातम् । यतो लघुशब्दरत्नकृन्मते अपि प्रयोजनं नास्ति, तल्लिखति लघुशब्दरत्ने – ''अत एव अटि हकारग्रहणप्रयोजनकथनावसरे भाष्ये ''शश्छोऽटि'' 8–4–63 इत्युपन्यस्य तदुदाहरणं नोपन्यस्तम् । हकारपरशकारासम्भवेन ''शश्छोऽटि'' इति प्रसङ्गोच्चारितमिति च कैयटेन व्याख्यातम् । अमि हकारप्रयोजनमिति च भाष्ये नोक्तमिति दिक् ।[8]'' सुधानिधिकृत्तु अमि प्रयोजनमङ्गीकरोति ।

अत्रायं समाधिरस्माकम् – अस्माकं तु सुधानिधिकारमतमेतद्विषये न समीचीनमिति भाति तदनुपदमेव ग्रन्थान्तरप्रमाणेभ्यः स्पष्टीभविष्यति । सुधानिधिकृता यान्युदाहरणानि प्रदर्शितानि – ''क् श् ह् इत्याह'' तत् श्हौ'' इत्यादीनि अनुकरणस्थलानि, तानि पूर्वोक्तकैयटग्रन्थेन लघुशब्दरत्नग्रन्थेन च प्रत्युक्तानि । तत्र स्पष्टं लिखितं यत् हकारपरशकारासम्भव इति तस्माद्भाष्य

उदाहरणं न प्रदर्शितम् ।अत एव बैद्यनाथपायगुण्डोऽपि भावप्रकाशे ''आदिना हकारपरिग्रहः'' इति भैरवीप्रतीकमुद्धृत्य, एवं जश्त्वं ढत्वस्याप्युपलक्षणमिति भावः ।एतेन ''पुम् ह् क् हा'' वित्युदाहरन्तो मान्या मान्या एवेति सूचितम् ।कस्य जश्त्वापत्तेः । अत एव तावन्मात्रोल्लेखः। ततोऽग्रे ''स्कोः'' इत्यादीनामन्यथोपपत्तेर्दृष्टान्तासङ्गतेर्गुरुचरणैस्तथानुल्लेखाच्च' इति कथयन् मान्या मान्या इति व्याजस्तुत्या एवमुदाहरतो दूषयति । अनेन स्पष्टं यत् सुधानिधिकृन्मतमत्र न युक्तम् । अपि च सुधानिधिकृदुक्तो बृहच्छब्दरत्नकारोप्यनयैव युक्त्या प्रत्युक्तः ।अन्यदपि अनेन परिशीलितं भवत्यत्र यद् बृहच्छब्दरत्नकारस्य सिद्धान्तोपस्थापने भाष्यादिग्रन्थविरोधाल्लघुशब्द–रत्नमेव वैयाकरणनिकाये प्रमाणत्वेनाद्रियते । अत एव चास्य लघुशब्दरत्नग्रन्थस्य नागेशकृतित्वमप्यङ्गीकुर्वन्ति ऐतिह्यकोविदः, बहुत्र शेखरस्थपङ्क्तीनामनेन साम्यदर्शनात् । स्वगुरोर्नाम्ना नागेशेनैवास्य ग्रन्थस्य कृतत्वादित्यादिविचार आस्तां तावद्विस्तरभिया प्रकृते अनुपयोगाच्चेत्यलम् ।अन्ये च येंऽशा ''हयवरट्'' सूत्रे सुधानिधिकृता यथा – हरयवट् इति न्यासं प्रदर्श्य तत्र दोषानुद्भाव्य, तत्परिहाराय च हयवरट् इति यथाश्रुतन्यास एव ज्यायानिति सिद्धान्तोपस्थापनम्, अयोगवाहानामट्सु शर्षु चोपदेशप्रयोजनम् इत्यादयो यथा भाष्यकौस्तुभादौ विचारिताः, तत्र नास्यापि मतभेद इति नात्र ते पुनरालोचिताः, ग्रन्थान्तरेषु विस्तरेण चर्चितत्वात् । इतीयं ''हयवरट्'' इतिसूत्रविषयिणी सुधानिधिकृन्मतालोचनपूर्विका समीक्षेति शम् ।

पादटिप्पण्यः–

1. व्या. सिद्धान्तसुधानिधिः, प्रथमभागे पृ.स. 46
2. व्या. सिद्धान्तसुधानिधिः, प्रथमभागे पृ.स. 47
3. प्रौढमनोरमा, सशब्दरत्नम् भैरव्यादिसंयुता संज्ञाप्रकरणे पृ.स. 7
4. प्रौढमनोरमा बृहल्लघुच्छब्दरत्नसहिता पृ.सं. 8
5. शब्दकौस्तुभः, प्रथमभागे पृ.सं. 32
6. प्रौढमनोरमा, सशब्दरत्नम् भैरव्यादिसंयुता संज्ञाप्रकारणे पृ.स. 10
7. व्या. सिद्धान्तसुधानिधिः, प्रथमभागे पृ.स. 48
8. प्रौढमनोरमा, सशब्दरत्नम् भैरव्यादिसंयुता संज्ञाप्रकरणे पृ.स. 11

9. प्रौढमनोरमा, सशब्दरत्नम् भैरव्यादिसंयुता संज्ञाप्रकारणे पृ.स. 8

सन्दर्भग्रन्थाः –

1. महाभाष्यम् (प्रदीपोद्योतराजलक्ष्मीकौस्तुभसमन्वितम्), सम्पा. श्रीगुरुप्रसादशास्त्री, प्रतिभाप्रकाशनम्, नवदेहली, 1999
2. शब्दकौस्तुभः, भट्टो जिदीक्षितविरचितः, चौखम्बासंस्कृतसीरीज् ऑफिस्, वाराणसी । सम्पा. पं. गोपालशास्त्री नेने, पं. मुकुन्दशास्त्री पुणतामकरश्च, 1991
3. व्याकरणसिद्धान्तसुधानिधिः (प्रथमो भागः) आचार्यविश्वेश्वरविरचितः, सम्पा. डॉ. सत्यप्रकाशदुबे, राजस्थानपत्रिका, 1999
4. प्रौढमनोरमा, सशब्दरत्नम् भैरवीभावप्रकाशसरलायुता, चौखम्बासंस्कृतसीरीज् ऑफिस्, वाराणसी । सम्पा. पं. गोपालशास्त्री नेने तृतीयसंस्करणम्, 2003
5. प्रौढमनोरमा, लघुबृहच्छब्दरत्नसहिता, काशी हिन्दू विश्वविद्यालयः, वाराणसी । प्रथसंस्करणम् 2001
6. भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकौमुदी (तत्वबोधिनीबालमनोरमायुता), म.म.गिरिधरशर्मणा म.म.परमेश्वरानन्दशर्मणा संशोध्य सम्पादिता, मोतीलाल–बनारसीदास, वाराणसी, 2004

प्रकृतौ भवं प्राकृतम्।

प्रा.डॉ. राजेन्द्र चिंतामणी जैन

भाषा संवादे प्रमुखं स्थानं भजते। भाषया एव आचार–विचाराणां, समाज–राज–धर्म–अर्थ–इतिहासादिस्थितीनां च आदान–प्रदानं सम्पद्यते। प्राक्कालादेव भारतो देशो विविधाभिः जाति–प्रजातिभिः, परम्पराभिश्च शोभमानो वर्तते। एतासां विविधपरम्पराणां जातिप्रजातिसम्बद्धप्रथानाम् इतिहाससम्बद्धकथानां च प्रतिबिम्बितं जनमनसि सहस्राधिकवर्षादनन्तरमपि तथैव स्पष्टं विद्यते इत्यत्र तात्कालिकानां संस्कृत–प्राकृत–पाल्यादिभाषाणामेव योगदानम्।

'अथ प्राकृत'मिति प्राकृतवैयाकरणस्य हेमचन्द्राचार्यस्य सिद्धहेमशब्दानुशासने अष्टमेऽध्याये प्रथमं सूत्रम्। अत्र 'प्रकृतौ भवं ततः आगतं वेति प्राकृत'मित्येनां व्याकरणसम्बद्धां प्राकृतपदनिष्पत्तिं निरूपयन्तः समालोचकाः प्रकृति–पदस्य अर्थं विभिन्नतया यथा पश्यन्ति तेन च, प्राकृतविषयकं चिन्तनश्चापि भिद्यते, तदत्रास्य शोधपत्रस्य प्रकृतो विषयः।

प्राकृतमिति पदं प्र उपसर्गपूर्वकं डुकृञ्(करणे) धातोः कृदन्त 'क्त' प्रत्यययोजनेन तद्धितान्तप्रत्ययेन च निष्पन्नं भवति। आधुनिकविधौ पदमिदं भूतकालवाचकं धातुसाधितं विशेषणमिति ज्ञायते। तथैव संस्कृतमित्यपि पदं सम् उपसर्गपूर्वकं डुकृञ्(करणे) (संस्करणे) धातोः कृदन्त 'क्त' प्रत्ययेन निष्पाद्यत इति ज्ञेयम्। पाश्चात्त्यविद्वत्सु मोनियरविल्यियम महोदयः स्वीयसंस्कृतशब्दकोशे प्राकृतपदस्य अर्थं मूलं, सहजं, आधारभूतं वेति

कथयति। डॉ.पिशेल महोदयः अपि स्वीये व्याकरणग्रन्थे प्राकृतं सामान्यजनानां भाषेति मनुते। डॉ.एल्फ्रेड सी. बुल्नर महोदयस्तु संस्कृतभाषां शिष्टसमाजेन सह प्राकृतभाषां च सामान्यसमाजेन सह समन्वेति[१] तथा च, मूल-च्छान्दसभाषया सह यथा संस्कृतस्य तथा प्राकृतस्यापि समसमयवर्तिसम्बन्धः अस्तीति ज्ञापयति।

प्राकृतम् इत्येका भारतदेशस्य संस्कृतिपरम्पराणां परिचायिनी भाषा। तथाहि, वस्तुतस्तु पुरातनभारतदेशे प्र-प्रारम्भकाले जनाः यया संवादं साधयन्ति स्म; सा सामान्यरूपेण भाषा इत्येव आसीत्। विशिष्टनाम्ना तस्याः उल्लेखो न कदापि बभूव। जनाः परस्परं भाषमाणा अपि 'अहम् इदानीं संस्कृतेन भाषे। इदानीं चाहं प्राकृतेन भाषे' इत्येतादृशं भाषाविकल्पं नैवाऽऽनुबभूवुः। सैषा भाषा व्याकरणादिनियमरहिता प्रायशः ग्रामीणभारतदेशीयाऽपि तत्तत्प्रान्तवासिभिः किंचिच्छिक्षितैरशिक्षितैर्वा भाष्यमाणा आसीत्। सा केनापि विशिष्टनामनिर्देशेन रहितेति कृत्वा अनन्तरवर्तिभिः समालोचकैः[२] 'प्रकृतौ भवं ततः आगतं प्राकृतम्' इति पदविग्रहेण प्राकृतमिति भाषा प्रोक्ता। तत्रापि इदमेकं हेतुकथनं युज्यते वक्तुं; तदित्थं- तात्कालिकसभ्यैः सुशिक्षितैः कलागुणादिचतुरैश्च आर्यजनैः तदानीं भारते कयाचिद् अनर्थशब्दरहितया सभ्यजनानां भाषया संवादं कर्तुमारम्भः कृतो बभूव। सा भाषा पूर्वतन-उच्यमानभाषातः सुतरां परिष्कृता सुसंस्कारिता च आसीदिति कृत्वा तस्याः संस्कृतमिति नामधेयं लोकप्रसिद्धतामवाप। सकृद्बोधपरया शास्त्रभाषया अनया संस्कृतभाषया तात्कालीन-सभ्यसमाजे भारतदेशे च महती ख्यातिः अवाप्ता। एतावत्कालपर्यन्तं पूर्वतन-सामान्यजनैः उच्यमानायाः भाषायाः कृते प्रतिस्पर्धिनी भाषा नैव लब्धा आसीदिति कृत्वा तत्पश्चात् 'तत्तद्विशिष्टा संस्कृतभाषा। तत्तद्विशिष्टा या भवतीति प्राकृत'मिति द्वयोः परस्पर-वैशिष्ट्यबोधनाय प्रकृतिपदागतसामान्यजनभाषायाः संस्कृतं प्राकृतं चेति

नामाभिधानं प्रचचाल। इदं चापि एकं युज्यते वक्तुं यत्- 'प्रकृति'रिति पदं प्रजा इत्यस्मिन्नर्थेऽपि युज्यते। अतः प्रकृतौ जनसामान्येषु यद् भवं ततः आगतं वा तत्प्राकृतमित्यपि प्राकृतपदं व्युत्पन्नं भवति। तथापि, एकं वक्तुं न विस्मरामो यत्, प्र-प्रारम्भकालादनन्तरं सभ्यजन-संस्कृतभाषया प्रमाणभाषारूपेण झटिति स्थानं समधिगतम्। किञ्च, प्राक्तनदेशे उच्यमानाः सामान्यजनप्रादेशिकभाषाः प्राकृतमिति नाम्ना स्थानं समधिगतवत्य इति कृत्वा प्राकृतपदस्थस्य 'प्रकृति'पदस्य सामान्यतोऽभिप्रायः। ताः च महाराष्ट्रीमागध्यादिप्राकृतभाषाः भारतस्य तत्तत्प्रदेशविशेषनाम्ना अभिधीयमानाः बभूवुः। यथाकथञ्चित्सावकाशम् एतासां प्राकृत-भाषाणां व्याकरणादिकं बह्वंशतः संस्कृतानुगुणं विनिश्चित्य एताः साहित्यभाषात्वेन समाजं संस्कृतिं च सभाजमानाः सन्ति। एतावता प्रकृतिपदगतसामान्यार्थप्रतिपादनेन 'द्वे संस्कृत-प्राकृते भाषे छान्दस(वैदिक)कालेन सह साक्षात्सम्बद्धे स्तः इति कृत्वा एते द्वे भाषे सहोदर्ये बभूवतुः' इत्यपि निष्पन्नं सम्भवतीति 'प्रकृतौ भवं प्राकृतम्' विग्रहवाक्यस्थस्य 'प्रकृति'पदस्य सामान्यार्थकथनम्। तथापि 'प्रकृति' पदसमुत्थिते द्वे परस्परभिन्नमते ग्रन्थकारैः ग्रन्थेषु निरूपिते दृश्येते। तेऽत्र सप्रमाणं विवेचनीये भवतः।

संस्कृतसाहित्यशास्त्रे रुद्रटाचार्यस्य मतानुसारं, रुद्रट-काव्यालङ्कारग्रन्थस्य टीकाकर्तुः नमिसाधोः अनुसारं, कवेः राजशेखरस्यानुसारं, प्राकृतकवेः वाक्पतिराजस्य चानुसारं, तथैव पूर्वोक्तपाश्चात्यग्रन्थकारस्य बुल्नरादिमहोदयस्यानुसारं प्राकृतं संस्कृतादिसर्वभारतीयभाषाणां मूलमास्ते। तथाहि, रुद्रटकाव्यालङ्कारस्य टीकाकारः नमिसाधुः प्राकृतपदस्थस्य 'प्रकृति'पदस्य अर्थमित्थं लिखति- "प्राकृतेति सकल-जगज्जन्तूनां व्याकरणादिभिरनाहित-संस्कारः सहजो वचन-व्यापारः प्रकृतिः तत्र भवं

 ISSN No. 2277-7067

सैव वा प्राकृतम्। प्राक् पूर्वं कृतं प्राक्कृतम्। बाल-महिलादिसुबोधं सकलभाषानिबन्धभूतं वचनमुच्यते। अत एव शास्त्रकृता प्राकृतमादौ निर्दिष्टं तदनु संस्कृतादीनि। पाणिन्यादिव्याकरणोदित-शब्द-लक्षणेन संस्करणात् संस्कृतमुच्यते।" इति अनेन टीकाकारो नमिसाधुः स्पष्टीकरोति यत् प्राकृतं संस्कृतस्य मूलमास्ते इति।

नमिसाध्वनुरूपमेव संस्कृतकाव्यशास्त्रस्याचार्यः कविः राजशेखरोऽपि "यद्योनिः किल संस्कृतस्य सुदृशां जिह्वासु यन्मोदते।[3] इत्यादिकथनेन प्रकृतमतं साधयति। प्रायशः अष्टमशतके सञ्जातः कविः वाक्पतिराजः स्वीयमहाकाव्ये प्राकृतमूलं "यथा सर्वदिशातः जलं समुद्रं प्राप्नोति तथा समुद्रतः एव बाष्परूपेण बहिर्गच्छति तथैव प्राकृतभाषां सर्वाः भाषाः प्राप्नुवन्ति, प्राकृतभाषातः एव सर्वाः भाषाः च निस्सरन्ति।[4] इत्येवंविधकथनेन अस्य मतानुसारं प्राकृतभाषा जनभाषा रूपेण आसीत्। तत एव सर्वाः भाषाः प्रादुर्भूताः" इति एवमादिरूपेण प्राकृतस्याधारभूतत्वं स्पष्टीचकार।

अपरेऽस्मिन्मते प्राकृतभाषायाः प्रामुख्येन वैयाकरणाः हेमचन्द्राचार्यप्रभृतयः, संस्कृतसाहित्यिकाः धनिकादयश्च सन्ति। ते "प्रकृतौ भवं प्राकृतम्" इति पद-व्युत्पत्त्यर्थे 'प्रकृति'पदस्य अर्थं संस्कृतमिति स्पष्टतया निरूपयन्ति। ते ह्यत्र प्रकृतिपदस्य मूलस्वरूपं (प्रकृतौ सामान्यप्रजासु भवं ततः आगतं वेति) यौगिकम् अर्थं तिरस्कृत्य "प्राकृतं पठितुं प्रथमतया संस्कृतव्याकरणं संस्कृतं वाऽध्येतव्यम्" इति रूढ्यर्थम् आदाय 'प्रकृति'पदस्य अर्थं कुर्वन्ति। हेमचन्द्राचार्यः सिद्धहेमचन्द्रानुशासनमिति व्याकरणं लिलेख। सः स्वीयव्याकरणग्रन्थे सप्त अध्यायान् यावत्संस्कृतजैनव्याकरणं निरूपयति। ततः परम् अष्टमाध्याये संस्कृताधृतमेव प्राकृतव्याकरणम् अस्तीति निरूपयति।[5] स प्राकृतव्याकरणस्य आधारभूतत्वेन संस्कृतव्याकरणमस्तीति हेतोः

प्रकृतिपदस्यार्थं संस्कृतमिति कुर्वन् 'संस्कृतरूपायां प्रकृतौ भवं तत आगतं वेति प्राकृत'मिति प्राकृतपदनिर्वचनं चकार।

हेमचन्द्राचार्यवदेव प्राकृत-पदनिर्वचने प्रकृतिपदस्य संस्कृतमिति अर्थं निरूपयितारः अपरे केचन यथा- प्राकृतवैयाकरणेषु मार्कण्डेयः[6], साहित्यिकेषु धनिकः[7], वासुदेवः[8], लक्ष्मीधरः[9] सिंहदेवगणी[10] चेत्यादयः सन्ति। एतन्मतीयानां मतानुसारं 'प्रकृतौ भवं प्राकृतम्' इत्यत्रस्थस्य प्रकृतिपदस्य अर्थः 'संस्कृतरूपायां प्रकृतौ' इत्येवंरूपस्स्थितो भवति। तेन च, संस्कृतादनन्तरं प्राकृतमिति अपरं निर्वचनं निष्पन्नं भवति।

निष्कर्षकथनम्

प्राकृतमिति पदस्य निर्वचनप्रसङ्गे ग्रन्थकृद्भिः प्रकृतिपदस्य नैकार्थाः संदर्शिताः। प्रतिपादितानां सर्वार्थानामाधारेण सङ्गतयुक्त्याधारेण च प्राकृतविषयकं 'प्रकृतौ नाम सामान्यप्रजासु भवं आगतं वेति प्राकृतम्' इति प्रथमं चिन्तनं प्राचुर्येण बहुभिः समाधृतम्। एतस्यैव चिन्तनस्य अनुमोदनं साहित्यशास्त्रकाराभ्याम् रुद्रटाचार्य-राजशेखराभ्यां स्वीयग्रन्थे कृतम्। पाश्चात्यविदामपि प्राकृतनिर्वचनविषयकं प्रप्रथममेव चिन्तनम् अभीष्टम्।

अपरमतवादिनां चिन्तनं किञ्चिद्भिन्नं भाति। प्राकृतभाषा-व्याकरणस्य प्रकृतिः मूलं वा संस्कृतव्याकरणं भवतीति कृत्वा तेषां मते प्रकृतिपदस्य अर्थः संस्कृतमिति क्रियते। अनेनैव चिन्तनेन, ते प्राकृतस्य मूलमाधारभूतं वा संस्कृतम् अस्ति इत्यपि वदन्ति। परं, भाषा-व्याकरणयोः तथाऽविनाभावित्वं न सिद्ध्यति। यथा- शिशुः व्याकरणज्ञानं विनापि काञ्चिद् तस्य भाषां भाषमाणोऽवलोक्यते। अतः व्याकरणेन विनाऽपि अथवा (संस्कृताधृत) प्राकृतव्याकरणात्प्रागपि प्राकृतभाषा भाषारूपेण भवितुमर्हति अर्हा च स्यादिति मतं सङ्गतं भाति। किंबहुना, क्वचिद् वेदसंहितासु अपि

विकृत, किंकृत, निकृत, दन्द्र, प्रथ् ग्रथ् क्षुद्र इत्यादीनां संस्कृतपदानां स्थलेषु क्रमशः विकट, कीकट, निकट, दंड, पठ, घट, क्षुल्ल इत्यादीनि प्राकृतपदानि लभ्यमानानि दृश्यन्ते। किञ्च, सत्सु विभिन्नमतेष्वपि, संस्कृतकाव्यशास्त्रस्य साहित्यदर्पणस्य विज्ञप्रियाटीकोक्तरीत्या ज्ञानार्णवोक्तरीत्या च-

'नाट्ये (काव्ये च) मध्यमपात्राणां हि प्राकृतभाषित्वम्।[११] पात्रस्य मध्यमत्वम् अतिमहतः श्रीरामचन्द्रादेर्न्यूनत्वेन।

भाषा मध्यमपात्राणां नाटकादौ विशेषतः।
महाराष्ट्री सौरसेनीत्युक्ता भाषा द्विधा बुधैः।।[१२]

इत्यादिना एकं तथ्यभूतं सदैव समेषां पुरस्तिष्ठति यद्- द्वेऽपि संस्कृतप्राकृते भाषे समसमयवर्तिन्यौ परस्पराश्रयणेनैव स्वसाहित्यस्य चरमोत्कर्षं साधयामासतुरिति।

सन्दर्भाः

१. Introduction to Prakrit, by Dr.Bulnar

२. हेमचन्दादिभिःप्राकृतवैयाकरणैः।

३. बालरामायणम्, ४८,४९

४. सअलाओ इमं वाआ विसंति एत्तो अ णेंति वाआओ। एंति समुद्दं चिअ णेंति साअराओ च्चिय जलाइं।। (गउडवहो महाकाव्ये ९३ गाथा)

५. प्रकृतिः संस्कृतम्। तत्र भवं तत आगतं वा प्राकृतम्। संस्कृतानन्तरं प्राकृतमधिक्रियते। (सिद्धहेमशब्दानुशासनम्, ८.१)

६. प्रकृतिः संस्कृतम्। तत्र भवं प्राकृतमुच्यते। (प्राकृतसर्वस्वम्,१.१)

७. प्रकृतेः आगतं प्राकृतम्। प्रकृतिः संस्कृतम्। (दशरूपकटीका,२.६०)

८. प्राकृतस्य तु सर्वमेव संस्कृतं योनिः। (संजीवनी टीका,९.२)

९. प्रकृतेः संस्कृतायास्तु विकृतिः प्राकृती मता। (षड्भाषाचन्द्रिका, पृ.४)

१०. प्रकृतेः संस्कृतादागतं प्राकृतम्। (वाग्भटालंकारः,२.२)

११. साहित्यदर्पणे षष्ठपरिच्छेदे अर्थोपक्षेपकवर्णनप्रसंगे भट्टाचार्य महेश्वर तर्कालंकारस्य विज्ञाप्रिया टीकाकर्तुः स्पष्टीकरणम्..

१२. भाषार्णवः

वैदिकमन्त्राणां संस्कृतपद्यानुवादः

मन्युसूक्तम् (ऋ 10–83–84)

प्रा. रमेश खेर

भूमिका – 'मन्युसूक्तम्', 'सौरसूक्तम्'', 'ब्रह्मणस्पतिसूक्तम्' च इत्यभिधाः वैदिकानां मन्त्राणां त्रयः संग्रहाः सुप्रसिद्धाः सन्ति। वैदिकाः मन्त्राः तावत् संस्कृतभाषायाः प्राचीनतमः आविष्कारोऽस्ति । तस्मात् नैतत् चित्रं यत् अभिजात–संस्कृत–भाषायाः अभ्यासकानामपि कृते ते अतिमात्रं दुर्बोधाः भवन्ति। अतोऽबाधिताशयानां मूलमन्त्राणां लौकिके संस्कृते पद्यानुवादे विहिते, अर्थाकलने सौकर्यं भवेत्। ततश्च उदात्तानुदात्तादि–स्वरबन्धनात् विमुक्तानाम् एतेषां श्लोकानां पठनमपि सुलभतरं संपद्येत, इतीयं कल्पना कालिदास–पुरस्कारेण संमानितानां ब्रह्मकर्मविदां मम ज्येष्ठानां सुहृदां श्री. वि. के. वैशंपायन–महोदयानां चेतसि समुदिता । प्रस्तुते पद्यानुवादे मया सविनयं विहितः अयं प्रयत्नः अविच्छिन्नायाः तेषां प्रेरणायाः एव मूर्तं फलम् अस्ति।

मन्युसूक्तम् – ऋग्वेदस्य दशमे मण्डले 83 तथा च 84 इति सूक्तद्वयं मन्युसूक्तम् इति प्रसिद्धमस्ति। अत्र तयोः पद्यानुवादः कृतोऽस्ति। अथर्ववेदे चतुर्थे काण्डे विद्यमानयोः 31 तथा च 32 इति सूक्तयोः अर्थोऽपि भूयसा समान एव अस्ति। मन्युशब्दस्य, 'क्रोधः', 'आवेशः', 'उत्साहः', 'धैर्यम्', 'शारीरम् आत्मिकं च बलम्', इत्यादयो विविधाः अर्थाः भवन्ति। उत्साहसंपन्नस्य विजिगीषोः वीरस्य कृते प्रवर्तते प्रस्तुतं मन्युसूक्तम्।

वाचकानां कृते सविशेषा सूचना – क्रमशः प्रकाश्यमानायामस्यां लेखमालायाम् अवकाशाभावात् मूलमन्त्राणां मुद्रणं न शक्यमस्ति। किन्तु जिज्ञासूनां कृते आवश्यकाः संदर्भाः निर्दिष्टाः सन्ति।

मूलमन्त्राणाम् आशयानुसारणे पद्यानुवादे क्वचित् एकस्मिन् एव श्लोके पङ्क्तिसंख्या द्व्यधिका भवेत् ।

मंत्र 1 –

यस्त्वां निषेवते मन्यो, वज्रसायकसन्निभ।
वृद्धिं नयति शरीरं, बलं स्वं मानसं च सः।।1।।

शक्तिदः शक्तिशाली त्वं, तव शक्त्या समन्विताः।
अरिमार्यमनार्यंच जेष्यामः सहितास्त्वया।।2।।

(मंत्र 1 – हे वज्रतुल्य व बाणतुल्य मन्यो । जो तुझी सेवा करतो, तो आपले शारीरिक व मानसिक बल वृद्धिंगत करतो. तू सामर्थ्यशाली व सामर्थ्यप्रदान करणारा आहेस. तुझ्या सामर्थ्याने युक्त होऊन तुझ्या साहाय्याने आम्ही आर्य व अनार्य अशा दोनही प्रकारच्या शत्रूंना जिंकून घेऊ.)

मंत्र 2 –

मन्युरिन्द्रोऽस्ति देवोऽयं, स होता वरुणस्तथा।
अग्निश्च सर्वविन्मन्युर्मतस्तत्त्वार्थदर्शिभिः।।3।।

मन्युं स्तुवन्ति मानुष्याः प्रार्थयन्ते च तं प्रजाः।
रक्ष मन्यो सदास्मांस्त्वं, सहर्षं तपसात्मनः।।4।।

(मंत्र 2 – हा मन्यु इंद्र आहे, हा देव आहे. तो होता आहे. तसेच तो वरूणही आहे. मन्यु हा सर्वज्ञ अग्नि आहे. असे तत्त्वार्थ जाणणाऱ्यांनी मानले आहे. मानवप्रजा

मान्युदेवतेचे स्वतन करते व तिची अशी प्रार्थना करते की, "हे मन्यो, तू आपल्या तपश्चर्येद्वारा आमचे सदैव आनंदाने रक्षण कर.")

मंत्र 3 –

अस्मान् प्रति त्वमागच्छ बलिनां बलवत्तमः।
शत्रूणां च विनाशं नः, कुरु मन्यो तपोबलात्।।5।।

अमित्राणामनार्याणां, विनाशं विद्विषां कुरु।
कुरु नो भरणं वित्तैः, समस्तैः सर्वतः सदा।।6।।

(मंत्र 3 – हे मन्यो ! सर्व बलाढ्य वीरांमध्ये अत्यंत बलाढ्य असलेला असा तू आमच्यापाशी ये आणि तुझ्या तपः सामर्थ्यानें आमच्या शत्रूंचा नाश कर. सर्व प्रकारच्या संपत्तीने सर्व बाजूंनी आमचे पोषण कर.)

मंत्र 4 –

रिपुनिर्दलने शक्तः स्वयंभूर्दीप्तिभास्वरः।
समर्थः खलु मन्यो त्वमरातीनभिधावितुम्।।7।।

सर्वसाक्षी च दुर्दम्यः, सर्वं सोढुं क्षमस्तथा।
निधेहि नश्च सेनासु, संप्राप्ते समरे बलम् ।।8।।

(मंत्र 4 – हे मन्यो! तू शत्रूंचा निःपात करण्याची शक्ती असलेला, स्वयंभूकांतीने झळाळणारा व खरोखर शत्रूंवर चाल करून जाण्यास समर्थ असलेला असा आहेस. तू सर्व साक्षी, दुर्दम्य व सर्व काही सहन करण्यास समर्थ आहेस. युद्ध ओढवले असता, आमच्या सेनेच्या ठायी सामर्थ्याची स्थापना कर.)

मंत्र 5 –

भाग्यहीनोऽस्मि संवृत्तस्त्वयि भूते पराङ्मुखे ।
पराभवं च संप्राप्तो, मन्यो ज्ञानिंस्त्वया विना ।।9।।

हविषो वञ्चितस्याहं, जातस्ते कोपकारणम्।
मामेहि मे बलं दातुं, मद्देहे संस्थितो भव ।।10।।

(मंत्र 5 – हे ज्ञानवान् मन्यो ! तू माझ्याकडे पाठ फिरविली असता, मी भाग्याला परखा होऊन, तुझ्या वाचून पराभूत झालो आहे. तुला हविर्भागाला वंचित केल्यामुळे, मी तुझ्या क्रोधाचे कारण ठरलो आहे, माझ्यापाशी ये, व मला सामर्थ्य देण्यासाठी, माझ्या शरीरात वास कर.)

मंत्र 6 –

विद्याधारं त्वदीयोऽहं, सर्वसहनिरन्तरः।
मामेहि संमुखो भूत्वा, मा भव त्वं पराङ्मुखः।।11।।

आवर्तस्व च मां मन्यो, वज्रधारिन्नुभावपि।
हनाव सहितौ दस्यून्, मामाप्तं कलय स्वकम्।।12।।

(मंत्र 6 – सर्वांचा आधार असलेल्या व सर्व सहन करणाऱ्या मन्यो! मी निरंतर तुझा आहे. सामोरा होऊन तू माझ्याकडे ये. तू पाठमोरा होऊ नकोस. हे वज्रधारी मन्यो! तू माझ्याकडे वळ. आपण दोघे मिळून दस्यूंना ठार करू या. मला स्वतःचा बांधव समज.)

मंत्र 7 –

प्रति मामेहि मन्यो त्वं, भव दक्षिणतो मम ।
बहूनां करवावावां, शत्रूणां क्षयमोजसा ।।13।।

समर्पयामि ते यज्ञे, सोमस्य मधुरं रसम्।
स्वाधारं तं पिबावावामेकान्ते प्रथमं ह्युभौ ।।14।।

(मंत्र 7 – हे मन्यो ! माझ्याकडे ये. माझ्या उजव्या बाजूस रहा. आपण दोघे आपल्या सामर्थ्याने अनेक शत्रूंचा नाश करूया. उत्कृष्ट आधार असलेला असा मधुर सोमरस मी तुला यज्ञात अर्पण करतो. तो प्रथम आपण दोघे एकांतात प्राशन करूया.)

मंत्र 8 –

साहाय्यात् ते गता हर्ष नरा नस्तीक्ष्णसायकाः ।
संशितैरायुधैर्युक्ता आरूढाः सदृशान् रथान् । ।15 । ।

अग्नितुल्यस्वरूपाश्च हे मन्यो मरुतस्तथा ।
आलम्ब्य धृष्टतां वीरा अभिधावन्तु स्वानरीन् । । 16 । ।

(मंत्र 8 – हे मन्यो! हे मरुतांनो! तुमच्या मदतीमुळे आनंदित झालेले, तीक्ष्ण बाण धारण करणारे, धारदार शस्त्रांनी युक्त असलेले, एकमेकांसारख्या रथांवर आरूढ झालेले व अग्नीसारखे तेजस्वी स्वरूप असलेले, आमचे वीर अनुयायी धैर्याचा अवलंब करून, आपल्या शत्रूंवर चाल करून जावोत.)

मंत्र 9 –

प्रदीप्ताग्निसमो मन्यो, त्वं शत्रून् निधनं नय ।
सेनापतिस्त्वमस्माकं, नूनं सर्वसहः स्मृतः । ।17 । ।

आहूतः संस्त्वमागच्छ, रिपून् हत्वा च तद्धनम् ।
विभजास्मासु शक्तिं च, धेहि द्रावय विद्विषः । ।18 । ।

(मंत्र 9 – हे मन्यो ! प्रज्वलित अग्नीप्रमाणे असलेला तू, शत्रूंना नष्ट कर. तू खरोखर सर्व काही सहन करू शकणारा, आमचा सेनापती मानला गेला आहेस. तुला आवाहन केले असता, तू आगमन कर. आणि आमच्या शत्रूंना ठार करून, त्यांचे धन आमच्यामध्ये विभागून दे. आम्हाला सामर्थ्य दे व आमच्या शत्रूंना पळवून लाव.)

मंत्र 10 –

कुर्वन् पीडां च शत्रूणां, मर्दनं च विमर्दनम् ।
आक्रम्य तान् प्रयाहि त्वं, मन्यो सर्वान् परंतप । ।19 । ।

उग्रतेजास्त्वमेकाकी, समस्तान् नयसे वशम् ।
वशिनामुत्तमं कस्त्वां, निरोद्धुं वर्तते क्षमः । ।20 । ।

(मंत्र 10 – शत्रूंना उपद्रव देत, त्यांना चिरडून, भरडून टाकीत, त्या सर्वांवर आक्रमण करीत, हे शत्रूंना ताप देणाऱ्या मन्यो ! तू पुढे चालून जा. उग्र तेजाने युक्त असलेला, तु एकटा सर्वांना ताब्यात ठेवतोस. इतरांवर ताबा गाजविणाऱ्यांमध्ये श्रेष्ठ असलेल्या तुला रोखण्यासाठी कोण बरे समर्थ आहे?)

मंत्र 11 –

मन्यो त्वमसि भूयिष्ठमेकोऽनेकैः प्रशंसितः ।
कुरु सज्जां प्रजां सर्वां, नो युद्धाय च सत्वरम् । ।21 । ।

अखंडदीप्तिमन्मन्यो, त्वया सहकृता वयम् ।
घोषं च तुमुलं कुर्मो, विजयाय नभःस्पृशाम् । ।22 । ।

(मंत्र 11 – हे मन्यो! तू एकटा अनेकांकडून अत्यंत प्रशंसिला गेला आहेस. आमच्या सर्व प्रजेला युद्धासाठी ताबडतोब सज्ज कर. हे अखंडकांति धारण करणाऱ्या मन्यो! तुझ्या सहकार्याने, आम्ही विजयासाठी गगनाला भिडणारा तुंबळ घोष करतो.)

मंत्र 12 –

देवेन्द्र इव मन्यो त्वं, विन्दसे विजयं सदा ।
अनवद्यो भवास्माकमधिपश्चाधिरक्षकः । ।23 । ।

स्तुमस्ते सुप्रियं नाम, सर्वसह रिपुंदम।
आविर्भूतोऽसि यस्मात् त्वं, स्रोतस्तद् विद्म ओजसः।।24।।

